B 5520

BENARES SANSKRIT SERIES; २३

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 89.

बोधसारः ।

श्रीविद्वद्वर्यनरहरिविरचितः ।

तच्छिष्यश्रीदिवाकरकृतयाऽर्थदीप्त्या सहितः ।

श्री ... तवर्यस्वामिगोविन्दानन्दशिष्येण

दयानन्दस्वामिना परिशोधितः ।

BODHSÂR,

A TREATISE ON VEDANTA,

BY

SRI NARHARI,

With a commentary by the author's pupil

PANDIT DIVÂKAR.

EDITED BY

...MÎ DAYÂNAND.

...sciculus I.

BENARES

Published by the Proprietors Messrs. Braj B. Das & Co.

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilas Press,

BENARES.

1—10548

यद्दृष्टिं न हि राति दृश्यमखिलं विश्वं सदित्यन्तरा
तज्जन्ये च सुखेतरे त्वतितरामन्तर्न रात्येव यत् ।
यज्ज्ञानं च महातमोगजहरिर्ब्रह्मत्वतोऽसौ हरि
स्तन्नामाङ्कितसद्गुरुन्नरहरीत्याह्वान्भजेऽहंत्विति ॥६॥
गौरीमुखेऽर्पितकरो गुडमोदके-
षद्ग्रासेन शोभितमुखश्चलितस्वकर्णः ।
दूर्वाङ्कुरैश्चहरितैर्विलसत्किरीटो
विघ्नानि मे हरतु सिद्धिकरो गजास्यः ॥ ७ ॥
बोधसारगुरुसत्कृपालवा द्बोधसारहृदयप्रकाशिनीः ।
बोधसारहृदयं परिबोद्धुं बोधसारसुहृदां प्रतनोमि ॥८॥

इह कश्चित्[illegible]कमलचिन्मकरन्दमधुपस्तत्करुण-यैव चिदानन्दसमुद्रतरङ्गायितहृदयो दिवाकराह्वाभासो नरहरिचि-कीर्षितं ग्रन्थं मनसि निधाय तदभिधाननिरूपणपुरःसरं तन्नि-रूपणं प्रतिजानीते, अर्थतश्च शा[illegible] तस्यानुबन्धचतुष्टय-मपि सूचयति ।

ॐ किञ्चित्कुतूहलेनैव विदुषां प्रियकाम्यया ।
मङ्गलाचरणं कृत्वा बोधसारो निरूप्यते ॥ १ ॥

किंचिदिति। किंचित्कुतूहलेनैवानिर्वचनीयस्वसुखसाक्षात्का-रविलासेनैव न त्वन्यरंजनादिना केनचित्प्रयोजनेनेत्यर्थः। अ-नेन स्वप्रयोजनं स्वानन्दविलासलक्ष[illegible] सूचितम् । पर[illegible] चाह, विदुषां प्रियकाम्यया विवेकिनां स्वस्वरूपानन्दे चित्तस्थै-र्यलक्षणहितेच्छया ।

नन्वत्र व्याख्याकृतिप्रतिज्ञाश्लोके ग्रन्थकृतिव्याख्याकृति-रूपक्रिययोरेकस्यैव दिवाकरस्य कर्तृत्वमुक्तं, तथा दिवाकराह्वा-

भासो नरहरिरित्यत्र दिवाकरगुरोर्नरहरेरेव कर्तृत्वं सूचितं, तथा नत्वन्यरंजनादिनेत्यत्र स्वानन्दविलासेनैव ग्रन्थरचने प्रवृत्तिरुक्ता, परप्रयोजनं चाहेत्यत्र परप्रयोजनार्थमपीति पूर्वापरविरोध इतिचेद्। न दिवाकराद्ध आभासो यस्येति बहुव्रीहिणा बिम्बप्रतिबिम्बयोर्वास्तवाभेद इव ग्रन्थकर्तुर्नरहरेर्व्याख्याकर्तुर्दिवाकरस्य च वास्तवाभेदसूचनात्। अत एव पूर्वत्राप्यनेनैवाशयेन बोधसारं विधायेति ग्रन्थरचनक्रियायां व्याख्यानक्रियायां चैकस्य कर्तृत्वमुक्तम्। किंच विदुषामित्यत्र स्वस्यान्यविदुषां च वैदुष्यसामान्याद् ब्रह्मवित्त्वेन च स्वस्यान्यविदुषामपि ब्रह्मरूपेणैक्याद् नत्वन्यरंजनादिनेत्युक्तिः, प्रातीतिकमात्रभेदापेक्षया तु परप्रयोजनं चाहेत्युक्तिरेवं पूर्वापरविरोधाभावः। मयेत्यध्याहार्यं, मङ्गलाचरणं मङ्गलस्य मङ्गलार्थस्याचरणं रचनं कृत्वा विधाय। नन्वत्र मङ्गलाचरणं कथं संपन्नं मङ्गलवाचकशब्दानां देवतावाचकशब्दानां च मङ्गलार्थत्वेनसर्वत्रगृहीतत्वात्। तदुक्तम्।

'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः।
ते सर्वे मङ्गलाः प्रोक्ता ग्राह्या ग्रन्थादिमङ्गले' ॥ इति ॥

तेषामेव शास्त्रेषु मङ्गलकारित्वप्रसिद्धेर्देवतावाचकशब्दाभावान्मङ्गलशब्दस्य चाचरणसंबन्धार्थवत्त्वेन मङ्गलार्थवत्त्वासिद्धेश्चेति चेद्। नान्यार्थत्वेप्यस्य मङ्गलशब्दस्य पूर्णकुम्भन्यायेन मङ्गलार्थत्वान्मङ्गलकारित्वसिद्धेः। किं च ग्रन्थसमाप्तिप्रचयागमनाभ्यामपि तत्कृतमेवेति ज्ञेयम्। किं च बोधसारपदेनापि जीवब्रह्मैक्येष्टवस्तुस्मरणरूपं मङ्गलं स्पष्टमेवात्रेति सुष्ठूक्तं मङ्गलाचरणं कृत्वेति। मङ्गलाचरणस्य कर्त्तव्यतायां च महाभाष्यसंमतिः। 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि

प्रथन्ते सिद्धार्थद्योतकानि सिद्धार्थाध्येतृकाणि च स्युरि'ति । बोधसार एतन्नामकोग्रन्थो निरूप्यते कथ्यते । बोधपदेनात्र समष्टिव्यष्ट्यन्तःकरणावच्छिन्नचिदाभासाः सारपदेन च तद्बिम्बभूतं चैतन्यं सामानाधिकरण्येनाभिन्नं गृह्यते, तत्प्रतिपादकतय ग्रन्थस्याप्यभेदोपचाराद्बोधसारत्वम् । अनेन ग्रन्थस्यास्य तत्प्रतिपाद्याद्वयचैतन्यस्य च प्रतिपाद्यप्रतिपादकरूपो लक्ष्यलक्षकभावरूपो वा संबन्धो बोध्य इति सूचितं, तथैव बोधसारपदवाच्ययोर्जीवब्रह्मणोरेकत्त्वलक्षणो विषयश्च सूचितः । विदुषामिति पदेन च पदपदार्थवाक्यार्थज्ञानपूर्वकवेदान्तश्रवणादिकृतप्रयत्नास्तत्प्रतिपाद्येऽखण्डरसे व्यवहाराविरोधेनाऽपि[2] चित्तस्थैर्येप्सवोऽधिकारिणश्च विशिष्टा अत्र सूचिताः । प्रयोजनमपि किञ्चित्कूतूहलेनेति पदेन स्वाऽज्ञ[illegible] सर्वदुःखनिवृत्तिलक्षणानिष्टनिवृत्तिरूपप्रयोजनपूर्वकस्वानन्दाविर्भावलक्षणेष्टप्राप्तिरूपं सूचितमिति ज्ञेयम् । अस्य चादिमध्यावसानेषु मङ्गलविधानान्महाशास्त्रत्वम् । वक्ष्यति हि ।

आदौ गुरुस्तवो यत्र प्रान्ते च शिवपूजनम् ।
मध्ये मुकुन्दस्मरणं बोधसारः स उत्तम ॥ इति ।

तस्मादेतद्विचारेण स्वरूपे स्थैर्यलक्षणपुरुषार्थोऽधिकारिणां स्यादेवेति निश्चेतव्यम् ॥ १ ॥

एवं सप्रयोजनं सानुबन्धं सेष्टस्मरणमङ्गलं ग्रन्थनिरूपणं प्रतिज्ञायेदानीं शिष्टा[illegible]धेन स्वेष्टजीवब्रह्मैक्याविरोधेन च गणपतिस्मरणरूपं मङ्गलमाचरञ्शिष्याणां च तत्कर्तव्यताशिक्षायै श्लोकमेकं निबध्नाति ।

---

१ परव्यसनिनीवत् ।
२ व्यवहारावस्थायां समाध्यवस्थायां च सर्वदाखण्डैक्यचित्तस्थैर्येच्छावत्त्वद्योतकोपिशब्दः ।

अनन्तशक्तिसन्दोहपूर्णस्य परमात्मनः ।
विघ्नविध्वंसिनीं शक्तिं गणराजमुपास्महे ॥ २ ॥

अनन्तेति । अनन्तशक्तिसन्दोहपूर्णस्य अनन्ता अपरिमिताः शक्तीः सन्दोहयति परस्परानुकूल्येन स्वस्वकार्यजननक्षमाः करोतीति तथा सा मूलशक्तिस्तयापूर्णस्य । अपूर्णत्वस्य मिथ्यात्वेन तन्निषेधकस्य पूर्णत्वस्यापि शक्तिकार्यत्वम् । चितिशक्तिसत्वे श्रुतिः । 'देवात्मशक्तिं स्वगुणैर्निगूढामि'त्यादिः । परमात्मनः कार्यकारणातीतस्यात्मवस्तुनो विघ्नविध्वंसिनी सर्वकार्यपरिपन्थिविघ्ननिरासकर्त्रीं शक्तिं सामर्थ्यरूपां गणराजं गणराजनाम्नीं गणे भौतिके स्वप्रकाशत्वेन विराजमानत्वात् । 'राजाहः सखिभ्यष्टजि' तिटच् । शक्तिशक्तिमतोः पृथक् सत्त्वाभावाच्छक्त्यभिन्नमात्मानमेवेत्यर्थः । उपास्महे अखण्डैकरस्येन मदभिन्नत्वेन भावायामीत्यर्थः ॥ २ ॥

एवमेव स्वेष्टाविरोधेन सरस्वतीस्मरणमपि कृत्वा शिष्यशिक्षायै तदपि श्लोकेनोपनिबध्नाति ।

या प्रकाशविमर्शाभ्यां स्वरूपावस्थितिङ्गता ।
स्मरामि तामहं भक्त्या ज्ञानशक्तिं सरस्वतीम् ॥ ३ ॥

येति । या प्रत्यक्षा विदुषां प्रकाशविमर्शाभ्यां प्रकाशेन स्वरूपप्रकाशेन विमर्शः सदसद्विवेकस्तेन चोपलक्षिता सती स्वरूपावस्थितिं स्वप्रकाशचिन्मात्रस्थितिं गता प्राप्ता चिदानन्दघनाभिन्नत्वेन स्थितेति भावः । तामुक्तलक्षणां सरस्वतीं सर्वजीवचैतन्यनदीसमुद्रायितत्वेन सरस्वत्यभिधां ज्ञानशक्तिं सर्वज्ञानप्रकाशयितृसामर्थ्यरूपां स्वतश्च ज्ञानरूपां, परमात्मन इत्यत्राप्य-

षञ्जनीयम् । अहं तत्प्रकाशाभिन्नोऽहंत्वावच्छिन्नोऽहमाधारचित्सहितश्चिदाभासो भक्त्या निरतिशयप्रेमलक्षणयाऽहं ब्रह्मास्मीति प्रमारूपया वृत्त्या स्मरामि मदभिन्नां चिन्तयामीत्यर्थः ॥ ३ ॥

एवं तावत्सर्वारिष्ट[illegible]मं मङ्गलाचरणं कृत्वेदानीं मुमुक्षूणां मोक्षस्यैवेष्टत्वात्तस्य च तत्वज्ञानसाध्यत्वात्तस्य च श्रवणजन्यत्वेन तस्य च गुरुप्रसादलभ्यत्वात्तस्य च तद्भक्तिसाध्यत्वात्त[illegible]श्च तच्छ्रैष्ठ्यज्ञानाधीनत्वात्तच्छ्रैष्ठ्यनिरूपणार्थं मंगलार्थं च गुरुस्तवाभिधं प्रकरणमारभते द्वादशभिः । तत्र तावत् प्रथमतो गुरो रौदार्यातिशयनिरूपणपूर्वकं तात्विकं गुरुस्वरूपं लक्षीकृत्य प्रणमति ।

श्रीगुरून्परमानन्दस्वरूपानभिवादये ।
तापत्रयापहा येषां कृपा ब्रह्मामृतप्रपा ॥ ४ ॥

श्रीगुरूनिति । परमानन्दस्वरूपा[illegible] निरतिशयसुखमेव तत्त्वतः स्वरूपमसाधारणरूपं येषान्तान् श्रीगुरून्गृणन्ति हितमुपदिशन्तीति गुरवस्तान् सर्वहितोपदेष्टृत्वस्य वेदे प्रसिद्धत्वात्तस्य च 'यस्य निःश्वसितं वेदा' इति स्मृतेः, 'अस्य महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेद' इत्यादिश्रुतेश्च, परमानन्दस्वरूपपरमात्मन एव गुरुरूपत्वं तद्वाक्यत्वाद्वेदस्यातः परमानन्दरूपाविरोधेन सर्वहितोपदेशकत्वेन च परमात्मन एव गुरुरूपत्वेन प्रणामः कृत इति बोध्यम् । अभिवादये प्रणतिपूर्वकं प्रस्तौमि वदिधातोरभिवादनस्तुतिकरणमत्र प्रतिज्ञातमिति बोध्यम् ।

औदार्यमाह, येषामिति । येषां गुरुणां कृपा करुणैव स्वशरणपथिकानां तापत्रयापहा आध्यात्मिकाधिदैविकाधिभौतिकतापत्र[illegible] निरसनकर्त्री ब्रह्मामृतप्रपा अपरिच्छिन्नभूमानन्दजलपानार्थं

पानीयशालिकाऽस्ति । एतेन समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुं तत्त्वज्ञानार्थमभिगच्छेत् । 'आचार्यवान्पुरुषो वेदे'ति श्रुतेः, तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवये'त्यादि स्मृतेश्च, मोक्षसाधनभूततत्त्वज्ञानस्य गुर्वधीनत्वश्रवणाद्गुरुकृपयैवब्रह्मानन्दाविर्भावे तापत्रयनिवृत्तिर्भवतीति बोध्यम् ॥ ४ ॥

अथगुरुस्तवः ।

ननु विष्णोरेव तत्र तत्रसर्वत्र श्रैष्ठ्यमुक्तं मुक्तिप्रदत्वं च श्रुतं, तथाहि 'विष्णोर्नुकं वीर्याणि प्रवोचमि'त्यादौ अगणितवीर्यत्वं, नारायणाद्विधिर्जायते' इत्यादिषु सर्वकारणत्वेन ब्रह्मादिभ्यः श्रैष्ठ्यं च । भागवते च' ।

'सत्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्यधत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः ॥

इत्यादिषु मुक्तिप्रदत्वं च । अत स्तद्भजनं विहाय गुरुभक्त्यैव केवलं मुक्तिसिद्धिरिति कथं विरुद्धमुच्यत इत्याशङ्क्य मोक्षप्रदत्वेन यद्विष्णुत्वं प्रसिद्धं तद्गुरावेवास्तीत्याशयेनाह ।

मदमोहाभिधक्रूरमधुकैटभजिष्णवे ।
मोक्षलक्ष्मीनिवासाय नमः श्रीगुरुविष्णवे ॥ ५ ॥

मदमोहेति । मदमोहाभिधक्रूरमधुकैटभजिष्णवे मदयति विक्षेपयतीति मदोहङ्कारो मोहयति विस्मारयति स्वस्वरूपमिति मोहोऽज्ञानं तावेव क्रूरौ स्ववशंप्राप्तस्यातीवदुःखदौ न तु तादृशं क्रौर्यमितरयोः' तत्र च तत्सत्त्वमपि तन्मूलकमितीतरयोर्न्नत्वं सूचितम् । अतस्तावेवमधुकैटभौ तयोर्जिष्णवे जयशीलाय' अन्य-

विष्णौ तु यन्मधुकैटभजेतृत्वं तन्मदमोहकृतमेवेति गुरुविष्णोरित-राविष्णौ न्यूनत्वमुक्तमिति बोध्यम् । मोक्षलक्ष्मीनिवासाय मोक्ष-रूपैव लक्ष्मीर्नान्या 'भद्रैषां लक्ष्मीर्निहिताधिवाची'ति श्रुतौ भद्रेति विशेषणेन गुरुवाक्यस्थितलक्ष्म्या मोक्षरूपत्वप्रतिपादनात् । अ-न्यविष्णौ स्थितलक्ष्म्या बन्धनहेतुत्वेन निकृष्टत्वं' तेन च तद्वास-भूतान्यविष्णौ च तज्ज्ञेयम्। तस्या मोक्षलक्ष्म्या निवासायाश्रयाय' एतेनापि श्रीगुरुविष्णावन्यविष्णो रुत्कृष्टत्वं सूचितमिति बोध्यम्। श्रीगुरुविष्णवे सर्वेषां तत्तद्धितोपदेशकत्वेन सर्वव्यापकत्व दु-गुरोर्व्यापकत्वेन विष्णुत्वं' अन्यस्य कस्यचिदगुरुत्वेन विष्णु-त्वमेव नास्तीत्यभिप्रायः । तस्मै नमः प्रह्वीभावोस्तु । अतः श्री-गुरुरेव विष्णुर्नान्य इत्यभिप्रायः ॥ ५ ॥

ननु ब्रह्मादिष्वपि गुरुत्वमस्त्येवेत्याशङ्क्य तस्य गुणकृ-तत्वाद्गौणत्वं गुरौ तु गुणनैरपेक्ष्येण स्वतो गुरुत्वान्मुख्यत्वमित्याह।

गुणैर्गौरवमायाता हरिब्रह्महरास्त्रयः ।
गुणातीततयाऽस्माकं गुरवो गुरुताङ्गताः ॥६॥

गुणैरिति । हरिब्रह्महरा विष्णुर्ब्रह्मा रुद्रश्चैते त्रयोपि प्र-सिद्धा गुरुत्वेन ते गुणैः सत्त्वरजस्तमोभिः पालनादिषु गौरवं गुरुत्वमायाताः प्राप्ता न तु स्वतः । अत एव तद्गुरुत्वमन्ये-न्यक्रियासु व्यावृत्तमतस्तेषां गुरुत्वं नास्तीत्यर्थः । तु इति शेषः। अस्माकं गुरवस्तु गुणातीततया गुणराहित्येन गुरुतां श्रैष्ठ्यं गताः प्राप्ताः' अतो गुरूणां गुरुत्वं स्वतः सिद्धमिति सूचितम् । अस्माकमिति पदेनान्येषामेतादृशगुरुत्वेऽप्रत्यक्षेपि मदृष्ट्यैत-त्प्रत्यक्षमिति ध्वनितम् ॥ ६ ॥

पराक्रमतोपीतरदेवेभ्यः श्रैष्ठ्यमाह ।

पुरान्तकहरो रुद्रः कंसकेशिहरो हरिः।
चण्डमुण्डहरा चण्डी सर्वद्वन्द्वहरो गुरुः॥ ७॥

पुरान्तकेति। रुद्रः शिवः पुरान्तकहरः पुरस्य त्रिपुरस्यान्तकस्य यमस्य च हरो घातकोऽस्तीति शेषः, पुरान्तकयोरेव ग्रहणमत्र तत्पराक्रमस्य परिमितत्वज्ञापनायेति बोध्यम्। एवमुत्तरत्रापिज्ञेयम्। हरिर्विष्णुः कंसकेशिहरः कंसस्य केशिनश्च हरो घातकः, चण्डी क्रोधवती देवी चण्डमुण्डहरा चण्डनाम्नो मुण्डनाम्नोऽसुरस्य हरा घातिकाऽस्ति, अत्रापि तु इति शेषः। गुरुस्तु सर्वद्वन्द्वहरः सर्वेषां द्वन्द्वानां सुखदुःखादीनां हरो घातकः, अस्तीति शेषोऽप्यत्र कर्त्तव्यः। इतरदेवतानां द्वन्द्वैर्ग्रस्तत्वात्तत्पराक्रमस्य चाल्पत्त्वान्न्यूनत्वं, गुरोस्तु द्वन्द्वैरनभिभूतत्त्वात्प्रत्युत तन्नाशकत्वेनापरिमितपराक्रमत्वाच्चेतरदेवताभ्यः श्रैष्ठ्यमिति भावः॥ ७॥

इदानीमन्यदेवतानां बन्धनकारणधनादिफलदातृत्वेनानिष्टत्वादनुपास्यत्त्वं, गुरोस्तु केवलमोक्षप्रदज्ञानप्रदत्वेन मुमुक्षूणामुपास्यत्वं चाह।

यच्छन्ति देवतास्तुष्टा धनमायुः सुतं यशः।
ज्ञानं के नाम दास्यन्ति विना श्रीगुरुपादुकाम्॥ ८॥

यच्छन्तीति। देवता ब्रह्मविष्णुहरादयस्तुष्टास्तपआदिभिः साधनैः प्रसादिताः सत्यो धनमायुः सुतं पुत्रं यशः कीर्तिं च यच्छन्ति ददति। एतदुपलक्षणं सर्वविषयाणाम्, एतेन बन्धकारणविषयप्रदत्वेन मुमुक्षुभिरितरदेवताभजन आदरो न कर्त्तव्य इत्याशयः। श्रीगुरुपादुकां विना पादुकापदेनात्र गुरुस्वरूपज्ञानाभावे मुमुक्षूणां गुरुपादुकैव प्रतिमादिवत्पूज्या नान्येति सूचितम्। ज्ञानमात्यन्तिकमुक्तिसाधनं साक्षाज्जीवब्रह्मैक्यविषयकं महावाक्य-

जन्यं ज्ञानं, के नाम ब्रह्मादयः प्रसिद्धा अपि दास्यन्ति नेत्यर्थः। ब्रह्मादिषु यत्प्रसिद्धं ज्ञानप्रदत्वं तदपि गुरुरूपेणैवेति भावः ॥८॥

ननुब्रह्मादीनां कारणत्वेन यच्छ्रैष्ठ्यं सर्वे तदनादृत्य कुतो गुरोरेव श्रैष्ठ्यमुच्यत इत्याशङ्क्य तेषां गुणाभिमानित्वेनानादरणीयत्वं मुमुक्षूणां, गुरोस्तु गुणनाशकत्वेन मुक्तिप्रदत्वादादरणीयत्वमित्याशयेनाह।

जयति श्रीगुरूणां हि चरणाब्जरजोगुणः।
हतास्त्रयो यदेकेन रजःसत्त्वतमोगुणाः ॥ ९ ॥

जयतीति । हि यस्मात्कारणाच्छ्रीगुरूणामादरे बहुवचनं, चरणाब्जरजोगुणः पादकमलस्य परागवत्स्थितस्य [illegible]-वासनारूपस्य प्रतापरूपो गुणो जयति सर्वोत्कृष्टो वर्त्तते। केन कार्येणेत्यत आह, यद्यस्मात्कारणादेकेनान्यकर्मोपासनादि-साधननिरपेक्षेणैवेत्यर्थः । रजःसत्त्वतमोगुणाः कामज्ञानावरण-हेतुत्वेन प्रसिद्धास्ते हताः स्वस्वरूपप्रकाशज्ञानेन बाधिताः, अतो मुमुक्षूणां गुरुभक्तिरेवं मुख्या नान्येति भावः ॥ ९ ॥

इदानीं मुमुक्षूणां [illegible] निरूपयितुं स्वकृतं गुरूपासनं रूपकेणाह ।

तार्या वयं तरिर्बोध स्तरणीयो भवार्णवः ।
तत्कर्णधाररूपेण तारकं श्रीगुरुं भजे ॥ १० ॥

तार्या इति। वयं गुरूपासका बहुवचनं मद्वदन्येषामपि गुरूपासकानां मुक्तिर्भवतीति ज्ञापनाय, त[illegible] योग्या नान्ये गुर्वभक्ताः, बोधो जीवब्रह्मैक्यविषयकं महावाक्यजन्यमपरोक्षज्ञानं तरिस्तीर्यतेऽनया सा तरिस्तरणसाधनं नौका, भवार्णवो विषयजल-

पूर्णो रागादिग्राहषड्डर्मितरङ्गादिमत्वेन समुद्रः, स तन्तुं योग्यत्वात्तरणीयोऽस्ति, तत्कर्णधाररूपेण तत्र नाविकवत्तारकरूपतया तारकं तारकः प्रणवस्तन्नामानं श्रीगुरुं तद्वाच्यं लक्ष्यं वा भजे सोऽहमित्यभिन्नत्वेन चिन्तयामि ॥ १० ॥

ननु सर्वत्रेश्वस्याधिक्यप्रदर्शनात्कोयं निर्युक्तिक आग्रह ईश्वराद्गुरोराधिक्य इत्याशङ्क्याह ।

तारकस्योपदेशेन गुरुर्भूत्वा विमुक्तिदः ।
काश्यामपीश्वरस्तस्मा दीश्वरादधिको गुरुः ॥११॥

तारकस्येति । ईश्वरोपि स्वयमीश्वरः सन्नपीत्यर्थः, स्वस्मिन्न्यूनता बुध्येति शेषः। काश्यां पुरि तारकस्य संसारतारणक्षमस्य प्रणवस्योपदेशेन उपदेशं निमित्तं कृत्वा गुरुर्भूत्वा गुरुरूपं धृत्वेत्यर्थः । विमुक्तिदो मुक्तिप्रदो भवति, तस्मात्कारणादीश्वरादीशपदाद्गुरुर्गुरुपदमधिकं श्रेष्ठमित्यर्थः । नहि श्रेष्ठत्वं परित्यज्य निकृष्टत्वमङ्गीक्रियते क्वापि सामान्यविद्भिरपि, तर्हि सर्वज्ञेनेश्वरेण न्यूनं चेद्गुरुपदं कथमङ्गीक्रियेतेति भाव ॥ ११ ॥

नन्वीश्वरदर्शनहेतुत्वेन गुरोः श्रैष्ठ्यमस्तु, तथापि फलत्वेनेश्वरस्य तत्त्वरूपत्वाद्गुरुप्रसादेनैव तत्त्वप्राप्तिश्रवणात्सर्वत्रेश्वरस्यैव तत्त्वस्वरूपत्वाच्छ्रैष्ठ्यमित्याशङ्क्य ।

'यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् ।
तावन्नसद्गुरुं कश्चित्सच्छास्त्रमपि नो लभेद्' ॥ इत्यादिषूपासनागुरोरीश्वरप्रसादहेतुत्वस्य प्रतिपादनात्सद्गुरोस्तु ईश्वरप्रसादलभ्यतया तत्त्वस्वरूपत्वाच्छ्रैष्ठ्यमित्याशयेनाह ।

गुरोरनुग्रहादीश ईश्वरानुग्रहाद्गुरुः ।

श्रीगुरोर्दर्शनं हेतुः परं त्वीश्वरदर्शने ॥ १२ ॥

गुरोरिति । गुरोरुपासनोपदेष्टुरनुग्रहात्प्रसादेन ईश ईश्वरः प्राप्यत इतिशेषः, तत ईश्वरानुग्रहादीश्वरप्रसादाद्गुरुः सद्गुरुर्मुक्तिप्रदः प्राप्यते, अतः श्रीगुरोर्दर्शनमुपासनोपदेष्टुर्दर्शन मीश्वरदर्शन ईशप्रसादलब्धौ हेतुः कारणमस्तीत्यध्याहार्यं, तथापि श्रीगुरोर्दर्शनं तु मोक्षप्रदगुरोर्दर्शनं तु पर मीशप्रसादलभ्यत्वाद- तिश्रेष्ठमिति ज्ञेयम् । अतः श्रीगुरोरेव श्रैष्ठ्यात्तत्त्वरूपत्वमिति भावः ॥ १२ ॥

किं चेश्वरस्य सर्वकारणत्वाद्बन्धमोक्षकारणत्वेनातत्त्वं गुरोस्तु केवलमोक्षप्रदत्त्वात्तत्त्वत्व मित्याशयेनाह ।

ईश्वरः सर्वहेतुत्वा द्धेतुःसंसारमोक्षयोः ।

मोक्षस्यैव गुरुस्तस्मा न्नास्ति तत्वं गुरोः परम् ॥ १३॥

ईश्वरइति । सर्वहेतुत्वात् सर्वप्रपञ्चकारणत्वात्, 'एषयोनिः' 'यतो वा इमादिभूतानि जायन्त' इत्यादिश्रुतिषु कारणत्वं सर्व- स्यास्यप्रसिद्धम्, ईश्वरः समष्टिकारणोपाधिकः सर्वज्ञत्वादिमान् संसारमोक्षयोः संसारस्य मोक्षस्य च हेतुः कारणं भवति, रजस्त- मोभ्यां कामादिभिर्मोहादिभिश्च संसारकारणं, सत्त्वेन प्रका- शरूपेण मोक्षकारणं तदपि गुरुरूपेणेत्याशयः । गुरुस्तु मोक्ष- स्यैव कारणं ब्रह्मात्मैक्यज्ञानप्रदत्वेन केवलमोक्षस्यैवकारणं भ- वति, अत गुरोः परमन्यत्तत्त्वमनारोपितं पारमार्थिकं रूपं नास्ति न विद्यते, अतो मुमुक्षुभिर्गुरुरेवोपास्य इति भावः ॥१३॥

ननु 'काश्यां तु मरणान्मुक्तिरि'त्यादौ काश्यादिक्षेत्राणामपि मुक्तिप्रदत्वमुक्तमतः कथं गुरोरेव मुक्तिप्रदत्वमुच्यत इत्या- शङ्क्याह ।

विनापि क्षेत्रमाहात्म्यं गुरुमाहात्म्यतः किल ।
विमुक्तिर्यत्र कुत्रापि न काश्यां गुरुणा विना॥१४॥

विनापीति । क्षेत्रमाहात्म्यं क्षेत्रस्य काश्यादिक्षेत्रस्य माहात्म्यं सामर्थ्यं विनापि राहित्येनापि यत्र कुत्रापि मुक्तिप्रदक्षेत्रान्यभूमावपि अपिशब्दात्कुग्रामोषरकीकटादावपुण्यदेशेपि गुरुमाहात्म्यतः केवलगुरुकृपयैव विमुक्तिर्मोक्षो जायते किलेति प्रसिद्धमेतदागोपालं, गुरुणा विना गुरुं त्यक्त्वा काश्यां मुक्तिप्रदत्वेन प्रसिद्धायामपि मुक्तिर्न जायते, अतोऽन्वयव्यतिरेकाभ्यां गुरोरेव मुक्तिप्रदत्वं, क्षेत्रस्य तु तदर्थवादमात्रमितिभावः॥१४॥

इदानीं क्षमाप्रसादराहित्येनान्यदेवतानां निकृष्टत्वं गुरोस्तु ताभ्यां पूर्णत्वाच्छ्रैष्ठ्यमाह ।

क्षम्यतामिति किं वाच्यं प्रसीदेति किमुच्यताम् ।
क्षमाप्रसादसंपूर्णः स्वभावादेव मे गुरुः ॥१५॥

इतिश्रीबोधसारेगुरुस्तवाभिधं प्रकरणम् ॥ १ ॥

क्षम्यतामिति । अन्यदेवतास्विव गुरौ क्षम्यतां क्षमस्वेति किं वाच्यं किमर्थं वक्तव्यं निरर्थकमेव तत्तत्रेत्यर्थः । तथा प्रसीदेति प्रसन्नो भवेति किमुच्यतां किमर्थं वक्तव्यं तदपि निरर्थकं तत्रेत्यर्थः । कुतो निरर्थकत्वं क्षमापनप्रसादनयोस्तत्र ह मे इति मद्दृष्ट्येत्यर्थः, गुरुर्मोक्षप्रदोगुरुः परब्रह्मरूपत्वा, स्वभावादेव स्वत एव क्षमाप्रसादसम्पूर्णः क्षमया सहनतया प्रसादेन प्रसन्नतया च संपूर्णः परिपूर्णोऽस्ति, अतः क्षमापनप्रसादनयोर्नैरर्थक्यमिति भावः॥१५॥

इतिश्रीनरहरिशिष्यदिवाकरकृतौ बोधसारदीप्तौ
गुरुस्तवार्थप्रकाशः प्रथमः ॥ १ ॥

अथ शिष्यविवेकः।

एवं मुमुक्षूणां गुरौ सर्वदेवाभ्यः श्रैष्ठ्यनिरूपणेन गुरौ-भक्तिदार्ढ्यं विधायेदानीं कुमतिकृततर्कैः पण्डितमन्यैर्गुरुशिष्यसाम्यप्रतिपादनेन गुरुभक्तिशैथिल्यं माभूदिति गुरुशिष्यविवेकाख्यं प्रकरणमेकोनविंशतिश्लोकमारभ्यते, तत्र तावत्कुमतिकृततर्केण गुरुशिष्यसाम्यं सूचयन्नुपक्रमाह।

बीजं गुरूपदेशो हि जिज्ञासुः क्षेत्रमुच्यते।
विवेकांकुरजो बोध द्रुमो मोक्षस्तु तत्फलम् ॥१॥

बीजमिति। गुरूपदेशो महावाक्यजन्यं जीवब्रह्मैक्यविषयं ज्ञानं युक्त्या प्रतिपादितं बीजमहंब्रह्मेत्याकारनिश्चयवृक्षस्य कारणत्वेन वीजस्थानीयं, हि प्रसिद्धं बीजं वृक्षकारणमिति सर्वेषामित्यर्थः। जिज्ञासुः स्वस्वरूपं ज्ञातुमिच्छुः शिष्यः क्षेत्रं प्रसिद्धबीजवपनाय क्षेत्रमिवोपचर्यते उच्यतेऽतः भूमिरिति कथ्यते विद्वद्भिरिति शेषः। विवेकाङ्कुरजः सदसद्विवेक एवांकुरस्तस्माज्जात उत्पन्नो बोधद्रुमः अहंब्रह्मास्मीति साक्षाज्ज्ञानं तदेव द्रुमो वृक्षो, मोक्षस्तु तत्फलं मुक्तिर्ज्ञानवृक्षफलमित्युपचर्यते, [illegible] तु शब्देन मोक्षस्य जन्यत्वं नास्तीति सूचितम्। इति क्षेत्रबीजयोर्वृक्षजननं प्रति कारणत्वेन साम्यमिव गुरुशिष्ययोर्बोधं प्रति साम्यमेव[illegible]पः ॥ १ ॥

[illegible] दृष्टान्तदार्ष्टान्तिकयोः कारण[illegible] समानेपि निमित्तत्वोपादानत्वाभ्यां तयोर्न्यूनाधिकत्वमित्याशयेन ह।

यद्यपि क्षेत्रबीजाभ्यां विना न द्रुमसंभवः।

किं तु बीजमुपादानं निमित्तं क्षेत्रमुच्यते ॥२॥

यद्यपीति । यद्यपि एतत्सत्यमित्यर्थः, क्षेत्रबीजाभ्यां क्षेत्रेण बीजेन च विना ऋते द्रुमसम्भवो वृक्षोत्पत्तिर्न भवत्येव, तर्हि साम्यस्य [illegible]ति चेत्तत्राह किन्तु, तथापि बीजं वृक्षस्योपादानमुपादानकारणं क्षेत्रं भूमिर्निमित्तं निमि[illegible]च्यते कथ्यते विवेकिभिरिति शेषः, इदमेव गुरोः शिष्याच्छ्रैष्ठ्यमिति भावः ॥ २ ॥

इदानीमुपादानपरिणामवत्वेन दृष्टान्तदार्ष्टान्तिकयोरुपादानस्यैव श्[illegible]ह ।

द्रुमो बीजपरीणामो न क्षेत्रपरिणामकः ।

बोधो गुरुपरीणामो न शिष्यपरिणामकः ॥ ३ ॥

द्रुमइति । द्रुमो वृक्षो बीजपरीणामो बीजस्य सजातीयकोपादानस्य परीणामो विकारः क्षेत्रपरिणामकः क्षेत्रस्य भूमेः परिणामको विकारो न न भवति, तथा बोधो जीवब्रह्मैक्यज्ञानं गुरुपरीणामो गुरोः सच्चिदानन्दरूपगुरोः परीणामो विकारः शिष्यपरिणामकश्चिज्जडरूपस्य शिष्यस्य परिणामको विकारो न न भवति, गुरुबोधयोरैकजात्येन बोधस्य गुरुकार्यत्वं बोधशिष्ययोर्वैजात्येन निमित्तनैमित्तिकत्वम् । अतः बोधं प्रति गुरोर्मुख्यत्वं शिष्यस्य गौणत्त्वमिति भावः ॥ ३ ॥

ननु वृक्षबोधयोर्बीजगुरुकार्यत्वं कुतो निश्चेयं तत्राह ।

द्रुमो हि बीजजातीयः क्षेत्रजातीयको न हि ।

बोधो हि गुरुजातीयः शिष्यजातीयको न हि॥४॥

द्रुमोहीति। हि यस्मात्कारणाद् द्रुमो वृक्षो बीजजातीयो बीजजातिभवः क्षेत्रजातीयो भूमिजातिभवो न हि नैवाऽस्ति, बोधो हि जीवात्मैकत्वज्ञानमपि गुरुजातीयो गुरुजातिभवः सच्चिदानन्दत्वस्यैक्यात्, शिष्यजातीयः चिज्जडशिष्यजातिभवो न हि नास्त्येवेत्यर्थः ॥ ४ ॥

एतदेव स्पष्टमाह।

बीजेन बीजजातीयस्तरुः क्षेत्रे समर्पितः।
गुरुणा स्वात्मजातीयो बोधः शिष्ये समर्पितः ॥५॥

बीजेनेति। बीजेन वटादिकारणबीजेन बीजजातीयो बीजजातिभवो वृक्षस्तरुः क्षेत्रे भूमौ समर्पितः स्थापितः, तथा गुरुणा ब्रह्मस्वरूपेण महावाक्योपदेष्ट्रा स्वात्मजातीयोऽखण्डानन्दस्वरूपो बोधो ब्रह्मात्मैक्यज्ञानं शिष्ये शुद्धान्तःकरणेऽधिकारिणि समर्पितः स्थापितः, अतः शिष्यो निमित्तत्वान्न्यूनो गुरुस्तूपादानत्वादधिक इति निश्चेतव्यम् ॥ ५ ॥

एवमुपादानतया गुरोर्बोधं प्रति प्राधान्यं निमित्ततया च शिष्यस्य गौणत्वं च प्रतिपाद्येदानीं तदेव स्थूणानिखनन्यायेन द्रढयितुमाक्षिप्य दृष्टान्तान्तरेण स्थापयति।

वह्निप्रभा हि वर्त्तिस्था तमो हन्ति प्रकाशते।
तमोहन्त्री प्रकाशात्मा प्रभैव न तु वर्त्तिका ॥ ६ ॥

वह्नीत्यादिद्वाभ्याम्। हि प्रसिद्धमेवेदं वह्निप्रभा अग्नेः प्रकाशरूपा शक्तिर्वर्तिस्था कार्पाससूत्रमाश्रिता तमो गृहादिस्थितं नेत्रावरकमन्धकारं हन्ति नाशयति स्वयं च प्रकाशते

प्रकाशरूपा वर्त्तते । तत्रेति शेषः, वर्त्तिप्रभासमूहे लो[illegible]ष्ट्याऽन्ध-
[illegible]शलक्षणे कार्ये स[illegible]म्यप्रतीतावपि न तु सा प्रती-
तिस्तात्विकी भ्रान्तिरेव सा, विवेके तु तमो हन्त्यन्धकारनि-
रसनक्षमा प्रकाशात्मा प्रकाशस्वरूपा प्रभैवाऽग्निशक्तिरेव न तु
वर्त्तिका वर्त्तिका तु अन्धकारनाशक्षमा न भवतीत्यर्थः ॥ ६ ॥

दार्ष्टान्तिकमाह ।

गुरुप्रभा हि शिष्यस्था तमो हन्ति प्रकाशते ।
तमोहन्ता प्रकाशात्मा गुरुरेव न शिष्यकः ॥७॥

गुरुप्रभेति । हि स्तथार्थः, तथा गुरुप्रभा गुरुरूपाखण्डजीवा-
त्मैक्यविषयाऽहंब्रह्मास्मीत्याकारा प्रमारूपा वृत्तिः शिष्यस्था
साधनसंपन्नान्तःकरणविशिष्टचिदाभासमाश्रिता सती तमो वृत्तेः
स्वरूपाज्ञानं हन्ति नाशयति प्रकाशते स्वयं प्रकाशात्मरूपतया
ऽवशिष्यते, अत्रापि तत्रेतिशेषः । अज्ञाननाशप्रकाशनलक्षणे कार्ये
ऽन्तःकरणावच्छिन्नचिदाभासस्य साधिष्ठानस्य गुरूपदिष्टज्ञानस्य
च कारणत्वे समे प्रतीतेपि सा प्रतीतिः पारमार्थिकी न भ्रान्ति-
कृतैव सा, विवेके तु तमोहन्ता वृत्तेः स्वरूपाबोधलक्षणान्धका-
रस्य तमसो हन्ता नाशकः प्रकाशात्मा स्वयंप्रकाशतयाऽवशि-
ष्टस्वरूपश्च गुरुरेवास्ति न शिष्यकोऽल्पः शिष्योऽज्ञाननाश-
नसमर्थो न भवतीत्यर्थः । बोधे बोधावसाने च गुरोरेवावशिष्ट-
त्वाच्छिष्यस्य च बोधकाले तस्य च स्वरूपलयावस्थायामपि
असत्वाच्च गुरोः प्राधान्यं शिष्यस्य गौणत्वमिति भावः ॥ ७ ॥

पुनरपि तदेव द्रढयति दृष्टान्तान्तरेण द्वाभ्याम् ।

यदग्निः काष्ठमारुह्य भस्मसात्कुरुते पुरीम् ।
भस्मासात्कारणं तत्र गुणो वह्नेर्न काष्ठगः ॥८॥

यदिति । यद्यस्मात्कारणादग्निर्दाहकत्वेन प्रसिद्धो वह्निः काष्ठं दार्वादिकं दाह्यं वस्तु आरुह्याश्रित्य पुरीं नगरीं भस्मसाद्भस्मावशिष्टां कुरुते, तत्र वह्निकाष्ठयोरुभयोरपि भस्माऽवशेषणलक्षणे कार्ये कारणत्वप्रतीतिसाम्येऽपि अविवेक एव सा प्रतीतिः, विवेकदृष्ट्या तु तत्र वह्निकाष्ठयोर्मध्ये भस्मसात्कारणं भस्मावशेषणकार्यस्य कारणमुपादानकारणं वह्नेर्गुण एवाग्नेर्दाहकशक्तिरेव न काष्ठगो दाह्यकाष्ठनिष्ठ. शक्तिर्भस्मावशेषणकार्ये नोपादानरूपेत्यर्थः ॥ ८ ॥

दार्ष्टान्तिकमाह ।

> बोधात्मना गुरुः शिष्यमाविश्य दहति क्षणात् ।
> यद्द्वैतं सा गुरोः शक्तिर्न शिष्यस्येति निर्णयः ॥ ९ ॥

बोधात्मनेति । एवं बोधात्मना जीवब्रह्मैक्यबोधरूपेणैव गुरुरखण्डैकचिन्मात्रः परमात्मा शिष्यं साधनसहितान्तःकरणवृत्त्युपहितचैतन्यरूपमाविश्य प्रविश्य क्षणात्क्षणमात्रेण यद्द्वैतं द्वैतप्रतीतिकारणं यदंशरूपमज्ञानं तद्दहति नाशयति सा द्वैतनाशकर्त्री गुरोरखण्डचिन्मात्रपरमात्मनः शक्तिः सामर्थ्यं शिष्यस्यान्तःकरणावच्छिन्नचिदाभासस्य न तत्सामर्थ्यं न भवतीत्यर्थः, तत्कार्यत्वात्तस्य इति निर्णय एवं निर्णीतोऽर्थः सर्वशास्त्रेषु नास्मत्स्वोत्कल्पित इति भावः । अत्र युगलयोर्द्वयोर्मध्ये पूर्वयुगले वह्निप्रभावत्योस्तमोनाशप्रकाशनलक्षणकार्ये कारणत्वसाम्यमिव बोधबोध्यरूपगुरुशिष्ययोरज्ञाननाशनस्वरूपप्रकाशनलक्षणकार्यं प्रति समानत्वमित्याक्षेपः, वह्निप्रभाया एव प्रधानत्वमिवाज्ञाननाशप्रकाशलक्षणे कार्ये गुरोरेव मुख्यत्वमिति समाधानम् । उत्तरयुगले तु भस्मावशेषलक्षणे कार्ये वह्निकाष्ठयोः

साम्यमिव द्वैतदाहलक्षणे कार्ये गुरुशिष्ययोः साम्यमित्याक्षेपः, समाधानं तु नगरदाहलक्षणे कार्ये वह्निशक्तेः प्राधान्यमिव द्वैतदाहस्वरूपे कार्ये गुरुशक्तेरेव प्राधान्यमिति विवेकः ॥ ९ ॥

इदानीं पुनरपि तदेव द्रढयितुं पूर्वोत्तरपक्षेण निर्णयमाह सार्धाभ्याम्।

यद्यप्युदयने भानोर्यथा पद्मं प्रकाशते।
न काशन्ते तथा पद्माः काष्ठपाषाणमृण्मयाः ॥ १० ॥

यद्यपीति। भानोः सूर्यस्योदयन उदये जाते सति यथा यादृक् पद्मं कमलं प्रकाशते प्रफुल्लति, तथा तादृक् काष्ठपाषाणमृण्मयाः काष्ठकृतानि पाषाणकृतानि मृत्कृतानि च पद्माः कमलानि 'पद्मोऽस्त्री'त्युक्तत्वात्पुंस्त्वं नपुंसकत्वं चात्र पद्मशब्दस्य, न काशन्ते न प्रफुल्लन्ति तेषु तत्कमलत्वमारोपितं न तु वास्तवमिति भावः ॥ १० ॥

दृष्टान्तपूर्वकं दार्ष्टान्तिकमाह।

प्रकाशको रविर्यद्वत्पद्ममेव विकासयेत्।
गुरुस्तथा बोधकः सच्छिष्यमेव प्रबोधयेत् ॥ ११ ॥

प्रकाशकइति। यद्वद्यथा प्रकाशकः प्रकाशकर्त्ता रविः सूर्यः पद्ममेव [illegible]लमेव न त्वारोपितं विकासयेत् प्रफुल्लं कुर्यात्, तथा तद्वद्बोधक उपदेष्टा गुरुः शिष्यमेव सच्छिष्यमे[illegible] न तु नाममात्रं प्रबोधयेत्प्रबोधितं कुर्यात् ॥ ११ ॥

इदानी[illegible]दृष्टान्तेन गुरुशिष्यसाम्यानुवादेनोक्तं तद्दूरीकरोति।

प्रकाशकस्य महिमा प्रकाश्यादधिकः किल।

सूक्ष्मं विशेषं वक्ष्यामि गुरुसूर्यस्य तं शृणु॥१२॥

प्रकाशकस्येति । हे शिष्य प्रकाश्यात्प्रकाशकर्मभूतात्कमलादेः परिच्छिन्नात्प्रकाशकस्य प्रकाशयितुः सूर्यादेरपरिच्छिन्नस्य महिमा महत्वमधिक उत्कृष्टः किलेति निश्चेतव्यं नात्र सन्देहः कार्य इति । एवं श्रीगुरोः शिष्यादाधिक्यं प्रतिपाद्येदानीं पूर्वप्रकरणे सर्वदेवेभ्यः श्रीगुरोः श्रैष्ठ्यं प्रतिपादितं यत्तदत्र सूर्यदृष्टान्तेन तत्साम्यस्फूर्त्या ध्वस्तमतस्ततोऽपीदानीं गुरोः श्रैष्ठ्यं दर्शयति तच्छ्रवणे च शिष्यं सन्मुखीकरोति सार्धाभ्यां सूक्ष्ममिति, हे शिष्य त्वं गुरुसूर्यस्य गुरुरूपादित्यस्य प्रसिद्धादित्यात्सूक्ष्मं विचारमन्तरेण ज्ञातुमशक्यं विशेषं श्रेष्ठत्वेन कारणत्वातिशयं वक्ष्यामि तं विशेषं त्वं शृणु सावधानतया श्रोतव्य इत्यर्थः ॥ १२ ॥

तदेवाह ।

तत्तद्विवेकवैराग्ययुक्तवेदान्तयुक्तिभिः ।
शिष्यं नयति गुर्वर्कः स्वैक्यं स्वाद्भिन्नमप्यहो॥१३॥

तत्तदिति । गुर्वर्को गुरुरूपः सूर्यस्तद्विवेकवैराग्ययुक्तवेदान्तयुक्तिभिः, तत्त्वमादिपदार्थयोर्विवेकश्चानात्मपदार्थेषु वैराग्यं वैतृष्णं च ताभ्यां युक्ता या वेदान्तयुक्तयोऽन्वयव्यतिरेकाद्यास्ताभिर्लक्षितैर्वचनैरितिशेषः, स्वाद्गुरुरूपाद् भिन्नं भेदं प्राप्तमपि शिष्यं साधनसंपन्नमन्तःकरणावच्छिन्नं चिदाभासं स्वैक्यं स्वेनाखण्डैकरसब्रह्मणा सहैकत्वं नयति प्रापयति अहो इदमाश्चर्यं गुराविति भावः ॥ १३ ॥

प्रसिद्धसूर्ये तदभावं दर्शयाति ।

विकासकोऽपि तपनो न पद्मं स्वैकतां नयेत् ।
तस्मात्सर्वात्मभावेन सेव्या श्रीगुरुपादुका ॥१४॥

विकासकोपीति । तपनः सूर्यो विकासकोऽपि पद्मानां प्रकासकोऽपि पद्मं कमलं स्वैकतां सूर्यभावं न नयेन्नप्रापयेत् । तस्मात्सूर्यादपि गुरोराधिक्यात्सर्वात्मभावेन सर्वत्रात्मभावनया श्रीगुरुपादुका गुरुचरणारविन्दं सेव्या सेवितुं योग्या मुमुक्षूणां न त्वन्यत्, पादुकापदं चात्र यथार्थगुरुस्वरूपज्ञानाभावे प्रतिमावद्गुरुपादुकापूजाधिकार इति मुमुक्षूणां सूचनायेति ज्ञेयम् ॥ १४ ॥

ननु दातुः पात्रस्य च दानक्रियां प्रति साम्यमिव बोधक्रियां प्रति गुरुशिष्ययोः साम्यं कुतो न स्यादित्याक्षिप्य समाधत्ते ।

तत्सत्यं दातृपात्राभ्यां विना दानं न सिध्यति ।
तथापि पात्रं पात्रं स्याद्दाता परमकारणम् ॥१५॥

तदिति । दातृपात्राभ्यां दाता दानकर्त्ता पात्रं प्रतिगृहीता च ताभ्यां विना तौ वर्जयित्वा दानं दानक्रिया न सिध्यति सिद्धा न भवति तत्सत्यं प्रामाणिकमेवेदं, तथापि तयोः साम्यं न भवति । कुतः, पात्रं प्रतिगृहीता पात्रं धान्यसंचयनाद्यर्थं कुसूलादिवत्पात्रं स्याद्दातुर्देयस्य संचयनार्थं पात्रमेव स्यादतो न मुख्यत्वं तस्येत्यर्थः । दाता दानकर्त्ता परमकारणं मुख्यं कारणं तस्यैव तद्भोक्तृत्वादित्यर्थः । बोधं प्रत्युपादानत्वेन बोधावस्थायां तच्छेषत्वेन च गुरोरेव प्राधान्यं शिष्यस्य तु निमित्तमात्रत्वेन गौणत्वमिति भावः ॥ १५ ॥

इदानीं स्पर्शमणेरपि गुरोर्वैलक्षण्यद्योतनेन ततोऽपि गुरोः श्रैष्ठ्यमाह द्वाभ्याम् ।

भवेत्स्पर्शमणिस्पर्शाल्लोहं स्वर्णं न तन्मणिः।
गुरुस्पर्शमणिस्पर्शात्स एव भवति क्षणात् ॥ १६॥

भवेदिति। स्पर्शमणिस्पर्शात्स्पर्शनामकमणेः स्पर्शात्संयोगाल्लोहमयः स्वर्णं कनकं भवेत्स्यात् तच्च मणिः स्पर्शमणिर्न न भवेत्, गुरुस्पर्शमणिस्पर्शाद् गुरुरेव स्पर्शमणिस्तत्संयोगाच्छिष्यः स एव गुरुरेव क्षणादुपदेशक्षणे एव भवति स्याद्, अयमेव स्पर्शमणेर्विशेषो गुरुस्पर्शमणाविति भावः ॥ १६ ॥

सिद्धान्तयति।

एवं विवेकतो धीमन्नुपयोगो द्वयोरपि।
शिष्यो निमित्तमात्रं स्याद्गरिष्ठा गुरुपादुका ॥ १७ ॥

एवमिति। हे धीमन्निति सम्बोधनेन मूर्खाणान्तु गुरुशिष्ययोः साम्यं भासतु तव त्वेतदयोग्यमिति सूचितम्। 'एवमिति' विवेकतो विवेकेन बोध उपयोगो फलजनकत्वं द्वयोरपि उभयोरप्यविशेषेणास्ति, तथापि शिष्यो बुध्यवच्छिन्नः साधनसंपन्नश्चिदाभासो निमित्तमात्रं निमित्तमेव केवलं गुरुपादुका प्राधान्याद्गुरुः पादुकापदप्रयोगतात्पर्यं पूर्वमेवोक्तं गरिष्ठाऽतिश्रेष्ठाऽऽदरार्हेत्यर्थः ॥ १७ ॥

ननु वासिष्ठे ग्रन्थे।

'उपदेशक्रमे राम व्यवस्थामात्रपालनम्।
ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव केवलम्' ॥

इत्यादिवाक्ये गुरोः सकाशाच्छिष्यस्यैव श्रैष्ठ्यमुक्तमत तद्विरुद्धं गुरोः श्रैष्ठ्यं भवद्भिः कथं प्रतिपाद्यत इत्याशङ्क्य तस्यान्यार्थकत्वान्नैवमिति परिहरति।

उपदेशक्रमो राम व्यवस्थामात्रपालनम् ।
इत्यादि वचनं तत्तु शिष्योत्साहविवृद्धये ॥ १८ ॥

उपदेशेति । 'उपदेशक्रमो राम व्यवस्थामात्रपालनमि'त्यादिवचनं यत्तत्तु तत्सदृशमन्यदपि वाक्यजातमादिपदाद्ग्राह्यं शिष्योत्साहविवृद्धये शिष्यान्तःकरण उत्साहं विना बोधो न भवेदिति तदभिवृद्ध्यर्थं तदिति योज्यम् । अन्यथा ।

'यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् ।
तावन्न सद्गुरुं कश्चित्सत्छास्त्रमपि नोलभेदू' ॥

इत्यादिबहुवाक्यविरोधादिति भावः ॥ १८ ॥

इदानीमेतत्प्रकरणार्थप्रामाण्यप्रतिपादनपूर्वकं तत्फलोक्त्या तद्विचारकर्तव्यतां विधत्ते ।

सिद्धान्तः सर्वतन्त्राणां सद्यः प्रत्ययकारकः ।
सर्वदा भावनीयोऽयं गुरुशिष्यविनिर्णयः ॥ १९ ॥

इति श्रीनरहरिविरचिते बोधसारे गुरुशिष्यतत्त्वविवेकाख्यं
द्वितीयं प्रकरणम् ॥ २ ॥

सिद्धान्त इति । सर्वतन्त्राणां सर्वशास्त्राणां सिद्धान्तः सिद्धान्तभूतोयम् । अनेन प्रामाण्यमुक्तं, एतत्प्रकरणस्य फलमाह सद्यः प्रत्ययकारको विचारसमय एव गुर्वाधिक्यप्रतीतिद्योतकः, अयं गुरुशिष्यविनिर्णयो गुर्वाधिक्यनिर्णा॰कं प्रकरणमिदं सर्वदा निरन्तरं भावनीयो विचार्यः ॥ १९ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारदीपौ
गुरुशिष्यतत्त्वविवेकप्रकाशो द्वितीयः ॥ २ ॥

अथ ब्रह्मजिज्ञासा ।

एवं शिष्यस्य गुरौ श्रद्धामान्द्यनिमित्तं कुतर्कमूलं गुरौ स्वसाम्यं यदुत्पन्नं तद्युक्त्या परिहृत्य यदर्थं गुरुसेवा कर्त्तव्या तदर्थनिरूपणार्थमिदानीमुत्तरं प्रकरणमारभते पञ्चभिः ।

अथातो ब्रह्मजिज्ञासा जिज्ञास्यं ब्रह्म केवलम् ।
तटस्थलक्षणेनाथ स्वरूपस्य च लक्षणात् ॥ १ ॥

अथेति। अथ गुरुशरणगमनानन्तरमतो मुमुक्षूणां ब्रह्मज्ञानस्यैवेष्टत्वादित्यर्थः, ब्रह्मजिज्ञासा कर्त्तव्येति शेषः । ब्रह्मण इति कर्मणि षष्ठी, ननु ब्रह्मणोज्ञानविषयत्वे सद्वितीयत्वं तेन चावस्तुत्वे तस्य ज्ञानप्रयोजकत्वेन शास्त्राप्रामाण्यापत्तिः, अद्वितीयत्वे च ज्ञानाविषयत्वेन तत्प्रतिपादकशास्त्रस्य निर्विषयत्वेनाप्रामाण्यापत्तिः, अतः कथं ब्रह्मणो जिज्ञासाकर्मत्वमित्याशङ्क्याह केवलं निरुपाधिकं ब्रह्म देशकालवस्तुपरिच्छेदशून्यं जिज्ञास्यं ज्ञानेच्छाविषयो न तु सोपाधिकमतः पूर्वोक्तदोषो नेति भावः । सर्वनिषेधेन तस्यै[illegible]ज्ज्ञानस्य पुरुषार्थत्वं तत्प्रतिपादकशास्त्रस्याऽपि सप्रयोजनत्वेन च प्रामाण्यमिति भावः, ननु निरुपाधिकस्य कथं ज्ञानविषत्वं तत्राह तटस्थेति, तटस्थलक्षणेन तत्कारणत्वादिद्योतकानि लक्षणानि शाखादीनि यथैकदेशस्थत्वेपि चन्द्रलक्षकाणि तद्वदेतानि ब्रह्म वस्तुतोऽस्पृष्ट्वैव तल्लक्षकाणि भवन्ति, अतस्तेषां तटस्थत्वं जातित्वादेकवचनं च, स्वरूपस्य चाथ तटस्थलक्षणेन लक्षयित्वाऽनन्तरमित्यर्थः, स्वरूपस्य सत्यज्ञानादिस्वरूपस्य लक्षणानि प्रतिपादकानि तैर्लक्षणैर्ब्रह्म केवलं ज्ञानविषयो भवतीति भावः । एताभ्यां लक्षितं ज्ञानेछाविषय इत्युपचर्यते न तु वास्तवविषयत्वं ब्रह्मणो जिज्ञासाया इत्याशयः ॥ १ ॥

तत्र तटस्थलक्षणं निरूपयति ।

उत्पत्तिस्थितिनाशानां मूलकारणमीश्वरः ।
सर्वज्ञः सत्यसङ्कल्प इत्यादिषु तटस्थता ॥ २ ॥

उत्पतीति । उत्पत्तिस्थितिनाशानां जगत उत्पत्तेः स्थिते र्नाशस्य च मूलकारणं कारणं माया तदाधारो मूलकारणमीश्वर इशनादिशक्तिमान्सर्वज्ञः सर्वजगत्प्रकाशकः सत्यसंकल्पः सफलसंकल्पवानित्यादिषु 'यतो वा इमानि भूतानि जायन्त'इत्यादिषु वाक्येष्वित्यर्थः' तटस्थता तटस्थलक्षणं ज्ञेयम् ॥ २ ॥

स्वरूपलक्षणमाह ।

सच्चिदानन्दरूपं तत्स्वप्रकाशं परात्परम् ।
अनण्वित्यादिवेदोक्तं स्वरूपस्य तु लक्षणम् ॥३॥

सदिति । तद्ब्रह्म सच्चिदानन्दरूपं सदबाध्यं चिज्ज्ञप्तिमात्रस्वरूपमानन्दं निरतिशयसुखं रूपं यस्य तत् 'सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्मे'त्यादिषूक्तं स्वप्रकाशं स्वयं ज्योतिः स्वरूपम्, 'अत्रायं पुरुषः स्वयं ज्योतिर्भवती'ति श्रुतावुक्तं परात्परं परं कारणं जगतो माया तस्या अपि परं तयाऽस्पृष्टमित्यर्थः । अनण्वित्यादिवेदोक्तमणुत्वादिप्रतिषेधकविशेषणैरुक्तं यत्तत्स्वरूपस्य तुपदेन पूर्वलक्षणादेतस्य महद्वैलक्षण्यं द्योतितं, लक्षणं लक्षकं ब्रह्मणो ज्ञेयम् ॥ ३ ॥

इदानीमस्मिन्ग्रन्थे मोक्षे प्रधानसाधनभूतस्य ज्ञानस्यापेक्षितान्यन्यसाधनानि सन्ति तन्निरूपणं प्रतिजानीते ।

गुणप्रधानभावेन यद्यत्किञ्चिदपेक्षितम् ।
नानाप्रकरणव्याजैस्तत्सर्वमभिधीयते ॥ ४ ॥

गुणेति । गुणप्रधानभावेन गौणमुख्यभावेन यद्यत्साधनं प्रधानसाधनभूतज्ञानस्यापेक्षितमीप्सितं तत्सर्वं ज्ञानानुकूल्येनास्मिन्ग्रन्थे नानाप्रकरणव्याजैरनेकप्रकरणमिषेण मयेत्यध्याहार्यम्, अभिधीयते प्रतिपाद्यते ॥ ४ ॥

तन्निरूपणक्रमपीठिकां रचयति ।

बहिरङ्गान्तरङ्गाणां साधनानामनुक्रमः ।
यदन्तरङ्गं यस्मात्तु तत्पश्चात्तु निरूप्यते ॥ ५ ॥

इति श्रीनरहरिविरचिते बोधसारे ब्रह्मजिज्ञासाप्रकरणं तृतीयम् ॥३॥

बहिरिति । साधनानां प्रधानसाधनज्ञानसाधनानां बहिरङ्गान्तरङ्गाणां कतिचिज्ज्ञानस्य बहिरङ्गाणि कानिचिदन्तरङ्गाणीति साधनानां भेदः, अतस्तेषामनुक्रमोऽनुक्रमेणानेनेत्यनुक्रमः क्रमेणज्ञानमपेक्षितमतो यस्मात्साधनाद्यद्यदित्यर्थः, तत्तत्तदित्यर्थः, पश्चादनन्तरं बहिरङ्गं प्रथमतो निरूप्य पश्चात्ततोन्तरङ्गमित्यर्थः, तुपदेन वैलक्षण्यद्योतनपूर्वकमिति ज्ञेयं, निरूप्यते कथ्यते। एवमस्मिन्ग्रन्थे उत्तरप्रकरणे क्रमो ज्ञेयः ॥५॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ ब्रह्मजिज्ञासार्थप्रकाशस्तृतीयः ॥ ३ ॥

अथ वैराग्यपीठिकाबन्धः ।

एवं मोक्षे मुख्यसाधनभूतज्ञानस्य साधनानुक्रमनिरूपणं प्रतिज्ञायेदानीं सर्वसाधनेभ्यो बहिरङ्गत्वेन प्राथम्याद्वैराग्यस्य तज्ज्ञानं प्रथममपेक्षितमतस्तदर्थं वैराग्यपीठिकाबन्धाख्यं सार्धषट्षष्टिश्लोकं प्रकरणमारभते। तत्रावान्तरप्रकरणानि सप्त वैराग्यभेदनिरूपण कायविडम्बना वृत्तिविडम्बना कामविडम्बना क्रोध-

[illegible] लोभविडम्बना कर्मविडम्बनाऽऽख्यानि सन्ति, तानि क्रमेण निरूप्यन्ते । तत्रादौ वैराग्यभेदानिरूपणाख्यं पञ्चदशश्लोकं निरूपितं तद्व्याख्यायते तत्रादावेतत्प्रकरणश्रवणाय शिष्यं प्रेरयति ।

वैराग्यपीठिकाबन्धं प्रथमं शृणु सन्मते ।
न नेमिरेव यत्रास्ति स्थितिश्चक्रस्य कीदृशी ॥ १ ॥

वैराग्येति । हे सन्मत इति सम्बोधनेनैतच्छ्रुत्वाऽवधारणमेव-सन्मतित्वं तव युक्तमिति सूचितं, त्वं प्रथममादौ वैराग्यपीठिकाबन्धो वैराग्यस्य पीठिकाऽनुक्रमो बध्यते रच्यतेऽनेनेति वैराग्यक्रमबोधकं प्रकरणं शृणु श्रवणे सावधानो भवेत्यर्थः, ननु मुमुक्षो मोक्षस्यैवेष्टत्वात्तत्प्रधानीभूतसाधनज्ञानस्यैवेष्टत्वमतस्तत्प्रतिपादकवेदान्तश्रवणाद्येव कर्त्तव्यं किं वैराग्येणेत्याशङ्क्य वैराग्यं विना कृते ऽपि श्रवणादौ ज्ञानस्थिरता न न भवेदित्याशयेनाह नेति, यत्र चक्रे नेमिरेव सर्वाङ्गेषु सत्स्वपिं तच्चलनकारणभूता धारैव केवलं नास्ति तस्य चक्रस्य स्थितिश्चलनरूपे कार्ये स्थिरता कीदृशी कथं स्यान्न कथमपीत्यर्थः, तथा वैराग्यं विना ज्ञानस्याज्ञाननाशनलक्षणे कार्ये सामर्थ्यमेव न स्यादिति भावः ॥ १ ॥

एतदेवस्पष्टमाह ।

न शूद्रे वेदसंस्कारस्तैलञ्च सिकतासु न ।
न स्यात्करतले रोम तथा मुक्तिर्न रागिणि ॥ २ ॥

नेति । शूद्रे वेदसंस्कारो वेदोक्तो व्रतबन्धादिसंस्कारो न नास्ति सिकतासु [illegible] तैलञ्च तैलमपि न नास्ति । यथेति सर्वत्र योज्यं, यथा यादृक्करतले हस्ततले रोम केशो न नास्ति तथा तादृ-

रागिणि विषयासक्तपुरुषे मुक्तिर्ज्ञानफलरूपे मोक्षो न स्यान्न सम्भवेदतो मुमुक्षूणां प्रथमं वैराग्यमेवेष्टमित्याशयः ॥ २ ॥

एवं ज्ञानमुख्यसाधनभूतवैराग्यस्वरूपप्रतिपादकशास्त्रश्रवणे शिष्यमभिमुखीकृत्य तद्भेदं निरूपयति ।

वैराग्यं द्विविधं सूक्ष्मं तद्भेदमवधारय ।
जिज्ञासामुख्यमेकं स्याज्जिहासामुख्यमेव च ॥ ३ ॥

वैराग्यमिति । वैराग्यं विषयवैतृष्ण्यं द्विविधं द्विप्रकारमस्तीतिशेषः, ननु वैराग्यं स्वरूपेणैकधैव प्रतीयतेऽतः कथं द्वैविध्यमुच्यत इत्याशङ्क्याह सूक्ष्ममिति, सूक्ष्मं तल्लक्षणभेदज्ञानं विना दुर्ज्ञेयं तद्भेदं तस्य वैराग्यस्य भेदं मत्तोऽवधारय श्रुत्वा निश्चिनु, तमेव प्रतिज्ञातं निरूपयति जिज्ञासेति, एकं वैराग्यं जिज्ञासामुख्यं ब्रह्मज्ञानेच्छैव मुख्या निदानभूता यस्मिन्तत्स्याद्भवेच्च पुनरन्यज्जिहासामुख्यमेव त्यागेच्छैव मुख्या निदानभूता यत्र तदपि द्वितीयं वैराग्यमित्यर्थः ॥ ३ ॥

ननु किंविषया जिज्ञासा जिहासा चेति तज्ज्ञानापेक्षायामाह ।

जिहासा संसृतेर्ब्रह्मजिज्ञासेति द्वयं मुने ।
एकमेव तथाप्यस्ति विशेषः कश्चिदत्र हि ॥ ४ ॥

जिहासेति । संसृतेः संसारस्य जिहासा त्यक्तुमिच्छा ब्रह्मजिज्ञासा ब्रह्मणोऽपरिच्छिन्नात्मवस्तुनो जिज्ञासा ज्ञातुमिच्छेति जिहासाजिज्ञासयोर्विषयभेदोऽवगन्तव्यः, इदानीं तयोरपि भेदं निरूपयितुं तत्र विशेषं दर्शयति द्वयमिति । द्वयं द्वितयमपि एकमेकमेवेत्यावृत्तिरेकैकरूपमपीत्यर्थः, तथापि उभयत्रैकैकथा प्रती-

तावपीत्यर्थः, कश्चिद्विशेषः किञ्चिद्वैलक्षण्यमत्र द्विविधवैराग्येऽस्ति विद्यते हीति प्रसिद्धिद्योतकेनेदं विशेषभानं विदुषां प्रसिद्धमेवेति सूचितम् ॥ ४ ॥

तत्रोभयत्राऽपि मन्दमध्योत्तमभेदेन त्रैविध्यमस्ति, तेष्वपि प्रथमतो मन्दं जिहासामुख्यं सोदाहरणं लक्षयति।

राज्यभ्रष्टा दीर्घरोगाः पराधीना हतश्रियः।
ये विरक्तास्तपस्यन्ति जिहासामुख्यमेव तत् ॥५॥

राज्येति। राज्यभ्रष्टा राज्याच्च्युताः पुनाराज्याप्राप्तिं कारणैर्निश्चित्य दीर्घरोगा जन्मत आरभ्य मरणपर्यन्तं स्वशरीरे निश्चित्तरोगाः पराधीना मरणपर्यन्तं स्वपराधीनत्वनिश्चया हतश्रिय गतसंपत्तिकाः पुनस्तत्प्राप्त्यभावनिश्चया एतदादिकारणैर्ये पुरुषा विरक्ता विषयभोगवितृष्णासन्तस्तपस्यन्ति एतादृशं जन्म मा भूदितोप्युत्कृष्टं स्वाधीनसर्वसंपत्तिकं जन्म स्याद्यस्मिन्नेतानि दुःखानि न स्युरितीच्छया तपः कुर्वन्ति तदिह जन्मनि प्रतीयमानं यद्विषयवैतृष्ण्यं तत्त्यागेच्छामूलकत्वाज्जिहासामुख्यमेव त्यागेच्छा᳚धानमेव ज्ञेयमिति शेषः। अस्य च जन्मान्तरीयभोगहेतुकत्वादधमत्वमिति भावः ॥ ५ ॥

इदानीं सोदाहरणमधमं जिज्ञासामुख्यं लक्षयति द्वाभ्याम्।

आधिव्याधिभयोद्वेगपारतन्त्र्यादिवर्जिताः।
ये धीरा मुक्तिमिच्छन्ति शृणु तेषामयं क्रमः ॥६॥

आधीति। आधिव्याधिभयोद्वेगपारतन्त्र्यादिवर्जिता आधिर्मानसं चिन्तादिजन्यं दुःखं व्याधिर्देहदुःखं ज्वरादिजन्यं भयं भीतिरुद्वेगश्चित्तास्थैर्यजन्यः क्लेशः। पारतन्त्र्यं पराधीनते

स्यादिभिर्दुःखैर्वर्जिता रहिता ये धीरा ब्रह्मचर्यादिसाधन-संपन्ना दुःखाद्यनुद्विग्नाश्च सन्तो मुक्तिं मोक्षमिच्छन्ति तेषां तद्वैराग्यं जिज्ञासामुख्यमेव ज्ञानेच्छामुख्यमेव ज्ञेयमित्युत्तरेणान्वयः, एतद्वैराग्यवत उदाहर्तुं तच्छ्रवणे शिष्यमभिमुखीकरोति।

शृण्विति, तेषामुक्तलक्षणानां जिज्ञासामुख्यवैराग्यवतामयं मद्वाक्स्थितो मत्प्रत्यक्षः क्रमो मन्दजिज्ञासावैराग्यवत्वबोधक आचारः कथ्यत उत्तरश्लोके तं शृणु श्रुत्वा चावधारय तदाचारे ज्ञाते तेषु स्थितमन्दजिज्ञासामुख्यवैराग्यज्ञानं स्यादिति भावः ॥ ६ ॥

तदेवोदाहरति।

कामधेनुर्गृहे येषां निवासो नन्दनेवने।
कश्यपाद्यास्तपस्यन्ति जिज्ञासामुख्यमेव तत्॥७॥

कामधेनुरिति। येषां कश्यपादीनां गृहे मन्दिरे कामधेनुः सर्वकामदोग्ध्री गौः सुरभिरस्ति येषां कश्यपादीनां निवासो वसत्यस्मिन्निति निवासो गृहं नन्दने वने नन्दननाम्नीन्द्रवनेऽस्ति, सर्वभोगप्राप्तिकारणकामधेनुप्राप्तौ सर्वे कल्पतरवः सर्वकामपूरका यत्र सन्ति तत्रैव वासप्राप्तौ सत्यामपि सर्वभोगसुखे सत्यपि नन्दनादेत्य कश्यपाद्या ऋषयो वैराग्यपूर्वकं तपस्यन्ति तपः कुर्वन्ति, इदमेवाधमजिज्ञासामुख्यं वैराग्यमिति भावः॥७॥

एवं मन्दजिज्ञासामुख्याजिज्ञासामुख्ययोर्वैराग्ययोर्भेदं प्रदर्श्य मध्यमयोस्तयोर्भेदज्ञानाय वैलक्षण्यं प्रदर्शयति त्रिभिः। तत्र प्रथमतो मध्यमं जिज्ञासामुख्यं लक्षयत्येकेन।

आधिव्याधिभयोद्वेगपारतन्त्र्यादिपीडिताः।

ये जीवा मोक्षमिच्छन्ति जिहासामुख्यता तु सा ॥८॥

आधीति। आधिव्याधिभयोद्वेगपारतन्त्र्यादिपीडिताः आध्यादीनामर्थ उक्त एव तैः पीडिताः पीडां प्राप्ताः सन्तो ये केचिज्जीवा मोक्षं संसारदुःखान्मुक्तिमिच्छन्ति अभिलषन्ति सा तु विरक्तता तुपदेन पूर्वोक्तजिहासामुख्यवैराग्यान्मु[illegible]च्छारहितान्मुक्तीच्छाजनकत्वरूपं वैलक्षण्यमत्र सूचितं, जिहासामुख्यताऽस्ति जिहासायास्त्यागेच्छाया मुख्यता प्राधान्यं यस्यां विरक्ततायां सा तथोक्ताऽतोऽस्य वैराग्यस्य मध्यमत्वमिति भावः ॥ ८ ॥

जिज्ञासामुख्यं मध्यमं वैराग्यं लक्षयति द्वाभ्याम्।

मानुष्यं दुर्लभं प्राप्तं सच्छास्त्रैः संस्कृता मतिः।
यदि न ब्रह्मविश्रान्तिस्तदस्माभिः किमर्जितम् ॥९॥

मानुष्यमिति। दुर्लभं दुःसाध्यं बहुपुण्यैः प्राप्यमित्यर्थः, मानुष्यं मनुष्यजन्म प्राप्तं लब्धं तत्रापि सच्छास्त्रैर्वेदान्तानुकूलैः शास्त्रैः सह वेदान्तैरित्यर्थः, मतिर्बुद्धिः संस्कृता सूक्ष्मा जाता यदि अथापि यर्हि ब्रह्मविश्रान्तिरपरिच्छि[illegible]ानन्दे चितस्थैर्यं न न स्याच्चेत्तर्हि अस्माभिः किमर्जितं किं संपादितं न किमपीत्यर्थः, मिथ्यात्वात्सर्वस्येत्यर्थः ॥ ९ ॥

इत्येवं व्यवसायेन ह्याकाशफलपातवत्।
जिज्ञासयन्ति ये धीरा जिज्ञासामुख्यता तु सा॥१०॥

इतीति। इत्येवं एवंप्रकारेण व्यवसायेन निश्चयेनाकाशफलपातवत्काकतालीयन्यायेनेत्यर्थः, हि प्रसिद्धमेतद्वासिष्ठादावित्यर्थः, धीराः साधनसंपन्नाः सन्तो ये रामादयो जिज्ञास-

यन्ति जिज्ञासां कुर्वन्ति 'तत्करोति तदाचष्टे' इति णिच् । सा तेषां विरक्तता जिज्ञासामुख्यता ज्ञानेच्छाया मुख्यता यस्यां सा तथा ज्ञेयेति शेषः ॥ १० ॥

एतद्वैराग्यवतोऽप्युदाहरति ।

विरोचनः कार्त्तवीर्यो बलिः श्रीराघवादयः ।
विरक्ता राजलीलायां ते हि तत्र निदर्शनम् ॥११॥

विरोचनइति । विरोचनो दैत्यो बलेः पिता कार्त्तवीर्यः कृतवीर्यस्य राज्ञः पुत्रः सहस्रार्जुन इत्यर्थः, बलिर्विरोचनपुत्रो दैत्यः श्रीराघवादयः श्रीराघवो रामचन्द्रस्तदादयस्तत्प्रभृतयः पुराणेषु प्रसिद्धा बहवः सन्ति राजलीलायां सहजेपि राजकर्मणि दुःखरहितेपि प्रजापालनादिरूपे कर्मणीत्यर्थः, विरक्ता उदासीनाः स्थिता इति शेषः । ते हि प्रसिद्धास्ते तत्र मध्यमजिज्ञासामुख्यवैराग्ये निदर्शनं निदर्श्यते प्रदर्श्यतेऽनेनेति तदुदाहरणमित्यर्थः, करणे ल्युड्ज्ञेयमिति शेषः ॥ ११ ॥

एवं मध्यमजिहासामुख्यजिज्ञासामुख्यवैराग्ये दर्शयित्वोत्तमे ते दर्शयति द्वाभ्यां, तत्रादावुत्तमं जिहासामुख्यं दर्शयति ।

तीव्रात्संसारवैराग्याद्ब्रह्मजिज्ञासनं यदि ।
वैराग्यं पुण्यजीवानां जिहासामुख्यमेव तत् ॥१२॥

तीव्रादिति । तीव्र[illegible]त्संसारवैराग्यात्संसारे वैराग्यं प्राप्येत्यर्थः, यदि यर्हि ब्रह्मजिज्ञासनं ब्रह्मज्ञानेच्छा केवलं स्यात्तद्वैराग्यं पुण्यजीवानां तद्बहुपुण्यैर्जीवानां जायते परन्तु जिहासामुख्यमेव जिहासैव मुख्या यत्र तत्तथा ज्ञेयमिति शेषः ॥ १२ ॥

उत्तमं जिज्ञासामुख्यं वैराग्यं दर्शयति ।

ब्रह्मजिज्ञासया तात तीव्रया यो विधीयते ।
विरागो दृश्यभावेषु जिज्ञासामुख्यमेव तत् ॥ १३ ॥

ब्रह्मेति। हे तात यो विरागो यद्वैराग्यं दृश्यभावेषु द्रष्टव्यपदार्थेषु तीव्रया दृढया ब्रह्मजिज्ञासया ब्रह्मज्ञानेच्छया विधीयते क्रियते तद्वैराग्यं जिज्ञासामुख्यमेव जिज्ञासैव मुख्या यत्र तत्तथा जिज्ञासाया एव प्रथमत उत्पन्नत्वादिति भावः ॥ १३ ॥

अथ सप्तमं पूर्वषड्वैराग्यविलक्षणं वैराग्यमाहार्धेन ।

सहजं यस्य वैराग्यं का वाच्या तस्य मुख्यता ।
अथ दोषाः प्रदर्श्यन्ते वैराग्यं दोषदर्शनात् ॥१४॥

सहजमिति । यस्याधिकारिधुरीणस्योत्तमाधिकारिण इत्यर्थः, सहजं स्वाभाविकं न तु दोषदृष्टिजनितं सर्वत्रात्मदर्शनाद्गुणदोषदृष्टिरहितत्वाच्च दोषदृष्टिरहितत्वाज्जिहासामुख्यं न प्राप्तस्वरूपत्वात्स्वाभाविकं सर्वत्रानात्मदृष्टिरूपं यद्वैराग्यमस्ति तस्य का मुख्यता जिहासाजिज्ञासयोर्मध्ये कस्य प्रधानता वाच्या वक्तव्या न कयोरपीत्यर्थः, अत एव पूर्वोक्तषड्वैराग्येभ्य इदं श्रेष्ठं विलक्षणं चेति भावः । एवं सप्तविधं वैराग्यं सलक्षणमभिधायेदानीं तस्य दोषदर्शनजन्यत्वात्तज्जननार्थं दोषप्रदर्शनं प्रतिजानीते सार्धेनाथेति, अथ वैराग्यभेदप्रदर्शनानन्तरं दोषदर्शनाद्दोषज्ञानाद्वैराग्यं जायतेऽतः दोषा दूषणानि प्रदर्श्यन्ते प्रदर्शयित्वा निरूप्यन्त इत्यर्थः ॥ १४ ॥

कथयामि समासेन सावधानमनाः शृणु ।

असमञ्जसतां साधो समारभ्य शरीरतः ॥१५॥

इतिश्रीबोधसारे वैराग्यपीठिकाबन्धे वैराग्यविवेचनं प्रकरणम् ॥ १ ॥

कथयामीति। हे साधो वैराग्यादिसाधनसंपादक शरीरतः शरीरात्समारभ्य प्रारभ्य सर्वविषयेषु असमञ्जसतां दोषरूपत्वं समासेन संक्षेपेण कथयामि निरूपयामि त्वं सावधानमनाः स्थिरचित्तो भूत्वेत्यर्थः, शृणु अवधारय ॥ १५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ वैराग्यपीठिकाबन्धार्थप्रकाशे वैराग्यविवेचनार्थप्रकाशः प्रथमः ॥ १ ॥

एवं वैराग्यं विविच्य दर्शयित्वा प्रतिज्ञातान्विषयदोषान्दर्शयिष्यन्प्रथमतः शरीरदोषान्द्दर्शयितुं कायविडम्बनाख्यं प्रकरणमाह नवभिः, तत्र तावच्छरीरे रम्यताप्रतीतिरन्यद्रव्यकृता न तु स्वतो रम्यत्वं शरीर इत्याह ।

यं भूषयन्ति कनकैर्वसनैश्चन्दनैरपि ।
अविचारत एवायं कायो रम्यत्वमागतः ॥ १ ॥

यमिति । लोकाः कनकैः सौवर्णालङ्कारैर्वसनैर्वस्त्रैः कञ्चुकोष्णीषादिभिश्चन्दनैरपि चन्दनादिसुगन्धिद्रव्यैश्च यं देहं भूषयन्ति भूषणैर्वस्त्रैश्चालं कुर्वन्ति चन्दनादिभिः सुगन्धयन्तीति विवेकः, यदि देहे स्वतो रम्यत्वं स्यात्तर्हि भूषणादिधारणं व्यर्थं स्यात्तथा यदि सुगन्धित्वं स्यात्तर्हि चन्दनादिलेपनं व्यर्थं स्याद्, अरम्यत्वमेव स्वतो देहे तदपाकरणार्थं भूषणादिधारणं तथा दुर्गन्धित्वं स्वतो देहे तद्दूरीकरणाय चन्दनादि-

ना लेपः क्रियतेऽतोऽरम्यत्वं प्रत्यक्षमेव, तथापि अविचारत एव केवलमविवेकेनैवायमरम्यतया प्रत्यक्षः कायः शरीरं रम्यत्वं सुन्दरत्वमागतः प्राप्तः सुवर्णवस्त्रादीनां सुन्दरत्वं चन्दनादीनां सुगन्धित्वमरम्ये दुर्गन्धिस्वभावे देह आरोप्य तस्यारम्यत्वं दुर्गन्धित्वं च तिरस्कृत्यायमेव देहो रम्यः सुगन्धरूप इति प्रतीतिरस्ति, सा भ्रान्तिमात्रमिति भावः ॥ १ ॥

इदानीमरम्यत्वमेव देहस्य स्पष्टमाह ।

अस्य क्रव्यादभक्ष्यस्य कृशानोरिन्धनस्य च ।
परिणामकृशस्यैव केन कायस्य रम्यता ॥ २ ॥

अस्येति । क्रव्यादभक्ष्यस्य क्रव्यादा मांसाहारिणो जीवा व्याघ्रादयस्तेषां भक्षितुं योग्यस्य कृशानोरिन्धनस्य चाऽग्नेः काष्ठादिवद्दाह्यस्य, एताभ्यां मांसादिरूपत्वेन दाहसमयेऽनुभूयमानदुर्गन्धित्वेन चारम्यता स्पष्टैवेति ज्ञापितं, जाड्यरूपत्वेन च परिणामकृशस्यैव ज्वरादिभिर्मध्ये मध्ये वृद्धत्वेन चान्ते दुर्बलस्यापि, एतेन कृशावस्थायामरम्यत्वं दुर्गन्धित्वं च स्पष्टमेवेति ज्ञापितमिति ज्ञेयम् । अस्य कायस्योक्तलक्षणस्य शरीरस्य रम्यता सुन्दरत्वं स्नेहास्पदत्वं कैव किं विषया न कापीत्यर्थः ॥२॥

ननु सुखभोगाश्रयत्वेन स्नेहास्पदत्वमस्त्यतो रम्यत्वमित्याशङ्क्य तन्नामनिरुक्त्या तदभावं दर्शयति ।

कलेर्वरमिदं स्थानं विग्रहो मूर्त्तिमानसौ ।
पञ्चभूतनिवासोऽयं कथं तत्र सुखी भवेत् ॥३॥

कलेरिति । इदं शरीरं कलेः कलहस्याधर्मबहुलस्य कालस्यापि वरं श्रेष्ठं स्थानं स्थीयतेऽस्मिन्निति स्थानं गृहं दुर्ग च

यथा सार्वभौमस्य सर्वा पृथिवी स्थानमपि निजाभिमानविषयं गृहं दुर्गं वा क्वचिद्देशे वर्तते, तत्र तत्स्थितिर्नित्यं दृश्यते । तथा कलहकालिकालयोरपि सर्वब्रह्माण्डव्याप्तयोः शरीरे स्वीयाभिमानेन नित्यं स्थितिर्ज्ञेया, अतः किंचित्कालं स्थितयोः क्वचिद्देशे तयोर्दुःखहेतुत्वं दृष्टं तत्कुतस्तयोर्नित्यस्थाने देहे सुखाशङ्केति भावः । पुनश्चासौ देहो मूर्तिमानाकारवान्विग्रहो युद्धं सर्वभूतानां भौतिकानामिन्द्रियाणां च परस्परं विरुद्धस्वभाववत्त्वेन तेषां च कार्यत्वाद्देहस्य विग्रहरूपत्वमिति भावः । किं चाऽयं देहः पञ्चभूतनिवासः पञ्चभूतानां निवासो वसतिर्यस्मिन्स गृहमस्ति, यत्र यत्र युद्धं भूतप्रवेशश्च जायते तत्र तत्र सुखं न भवतीति प्रत्यक्षमतः सर्वदा विग्रहरूपे पञ्चभूतनिवासे च देहे कुतः सुखाशङ्केति भावः, तत्र देहे कथं सुखी भवेन्न कथमपीत्यर्थः ॥ ३ ॥

ननु देहे सर्वदा सुखं मास्तु तथापि गर्भवासे सर्वबाह्योपाध्यभावात्तत्र सुखं स्यादिति तत्रैव वासः सर्वप्रयत्नैः साध्यः शुकेनापि गर्भे द्वादशवर्षं स्थितमत एवेति पुराणप्रसिद्धेरित्याशङ्क्य तत्रापि दुःखसत्त्वे हेतुमाह ।

> कारागृहं गर्भवासो बाल्यं केवलमूढता ।
> तत्रापि दुःसहात्यन्तं पराधीनतया स्थितिः ॥ ४ ॥

कारागृहमिति । गर्भवासो मातुरुदरे वासः स्थितिः कारागृहं कारा बन्धनं तस्य गृहं शालाऽस्ति बन्धनहेतुत्वात्तत्रापि न सुखमिति भावः, ननु गर्भस्थशरीरे सुखं मास्तु बालत्वे तु स्नेहः सर्वैः क्रियतेऽतस्तत्र सुखं स्यादिति तदेव सर्वदा सर्वप्रयत्नैः संपाद्यमित्याशङ्क्य तत्रापि तदभावहेतुं दर्शयति बा-

ल्यमिति, बाल्यं बालत्वं केवलमूढता केवलमत्यन्तं मूर्खत्वमेव । तद्दुःखहेतोरज्ञानस्य तत्र सत्वात्सुखहेतोर्ज्ञानस्य चात्यन्ताभावाच्चात्यन्तं दुःखास्पदमेव बाल्यमिति भावः, किं च तत्रापि अतिदुःखहेतावपि बाल्ये पराधीनतयाऽऽहारविहारादिषु अस्वाधीनतया स्थितिः स्थानमत्यन्तमतिशयं दुःसहासोढुमशक्या, इदं दुःखं तु सार्वजनीनानुभवविषयमिति भावः ॥४॥

ननु युवावस्थायां शरीरे सर्वकार्ये च स्वातन्त्र्यात्सर्वविषयभोगजन्यसुखसत्त्वाच्च तदेव साध्यमित्याशङ्क्य तत्रापि तदभावहेतुनिरूपणपूर्वकं तदसत्त्वं दर्शयति ।

कामबाणैर्यत्र पीडा कामिनीविरहज्वरः ।
पुष्कला पापसंपत्तिर्यौवनं विपदां वनम् ॥ ५ ॥

कामबाणैरिति । यत्र युवदेहे कामबाणैः कामस्य मनोभवस्य बाणैर्मोहनादिभिर्बाणसदृशैर्विकारैः पीडा दुःखं भवतीति शेषः, किं च कामिनीविरहज्वरः कामिनीनां कामवतीनां स्त्रीणां विरहेणाप्राप्तिजन्यदुःखेन ज्वरः सन्तापो भवति यौवने, किं च यौवने पुष्कला वह्वी पापसंपत्तिः सर्वदुःखकारणभूतपापनिष्पत्तिर्जायतेऽतो यौवनं युवावस्था विपदां दुःखवृक्षाणां वनं समूह एव कुतः सुखाशङ्का तत्रेति भावः ॥ ५ ॥

ननु जरावस्थायां कामाद्यभावात्पुत्रादिभिरादरणीयत्वाच्च सुखमस्त्वित्याशङ्क्याह ।

उन्नताऽनततां यातो जराक्षारविधूसरः ।
पुराणकूष्माण्डसमः कायो वृद्धस्य गर्हितः ॥ ६ ॥

उन्नतेति । उन्नतानततां गमने क्रियमाणे उन्नततामुच्चत्वमा-

नततां नम्रत्वं च यातः प्राप्तः कटिदेशे निर्बलत्वेनोन्नमनानमने पीडाजन्ये एवेति भावः, किं च जराक्षारविधूसरो वृद्धत्वनिमित्तकक्षारेण धूसरवर्णो भवतीत्यर्थः, क्षारपदेनात्र तज्जनितं तद्दुःखं लक्ष्यते। किं च पुराणकूष्माण्डसमः पुराणकूष्माण्डवदन्तर्निःसार इत्यर्थः, वृद्धस्य जरिणः कायो देहो गर्हितः सर्वजनैरनादृतो भवतीति शेषः, सर्वजनकृतानादरजन्यं दुःखं तत्र भवतीति सूचितम् ॥ ६ ॥

ननु मरणे सर्वदुःखकारणदेहाद्युपाधिरहितत्वात्सुखं स्यादित्याशङ्कमानं प्रत्याह।

> मरणस्य तु किं वाच्यं मृत्युदूतभयं ततः।
> नरके तु महद्दुःखं स्वर्गे पतनजं भयम् ॥ ७ ॥

मरणस्येति। मरणस्य तु मृतेस्तु किं वाच्यं तत्र दुःखं वचनानर्हमेव सर्वदुःखपरमावधित्वस्य सर्वलोकप्रत्यक्षत्वादनिर्वचनीयत्वा न वाच्यं तदिति भावः, ननु मरणानन्तरं सुखं स्यादित्याशङ्काह मृत्युदूतेति, ततः मरणानन्तरं मृत्युदूतभयं मृत्योर्यमस्य ये दूतास्तेभ्यो भयं भीतिर्जायतेऽतस्तत्रापि दुःखमस्तीत्याशयः, तत इत्यावर्त्तनीयम्, अनन्तरं नरके तु तुशब्देनोक्तसर्वदुःखेभ्यो नरके महद्दुःखं भवतीति सूचितं, ननु पुण्यकर्मिणां स्वर्गप्राप्तौ तत्र दुःखाभावेन तत्प्राप्त्यर्थमेव स्यादित्याशङ्क्याह स्वर्ग इति, स्वर्गे इन्द्रादिलोके तत्तद्विषयसुखे सत्यपि पतनजं पतनाज्जायमानं भयं भीतिरस्तीति शेषः, भयजनितदुःखसत्वात्तत्राऽपि तस्य दुःखरूपत्वमिति भावः ॥ ७ ॥

भोगकालेऽपि स्वर्गसुखे दुःखहेतुं दर्शयति।

उत्तमाधमभावेन तत्राप्यस्ति विडम्बना।
यदि पश्वादियोनिः स्यात्तदा दुःखस्य का कथा॥८॥

उत्तमेति। तत्रापि स्वर्गसुखभोगसमयेऽपि उत्तमाधमभावेनो-च्चनीचत्वबुद्ध्या विडम्बना तिरस्कारादिजनितदुःखमस्ति व-र्त्ततेऽतः स्वर्गे सुखं नास्त्येवेति भावः। ननु तर्हि स्वर्गनर-कयोः सुखाभावेऽपि अन्यत्रैव गतौ सुखं क्वचित्स्यादतः सैव प्रार्थनीया भवेदिति शङ्कामालक्ष्योभयगत्यभावे तृतीया गतिस्त-त्रापि दुःखं दर्शयति यदीति, पश्वादियोनिः स्याद्भवेद्यदि यर्हि तदा तर्हि दुःखस्य दुःखसम्बन्धिनी कथा वार्त्ता का न कापीत्यर्थः, सर्वकार्येषु पराधीनत्वस्य स्पष्टत्वादन-न्तत्वाच्च वचनानर्हमिति भावः॥८॥

ननु मरणानन्तरं पुनर्जन्म नेति नास्तिकमतं श्रुत्वा पुनर्ज-न्मास्ति वा नवेति सन्दिहानं प्रत्याह।

पुनर्जन्म पुनर्मृत्युः पुनर्दुःखं पुनर्भयम्।
न जानाति गतिं जन्तुर्निमग्नो मोहसागरे॥९॥

इति कायविडम्बना॥२॥

पुनरिति। जन्म जननं पुनर्मरणानन्तरं स्याद्भवेन्मृत्यु-र्मरणं पुनर्जननानन्तरं स्याद्दुःखं पुनर्दुःखानन्तरं स्या-द्भयं मृत्युः पुनर्जन्मानन्तरंस्यात्, ननु तर्हि जन्ममरणातीत-गतिः कुतो न साध्यते सर्वैरित्याशङ्क्याह नेति, जन्तुर्जीवो मोहसागरे मोहो मूलाज्ञानं तदेव सागर इवापारत्वात्त-स्मिन्निमग्नस्तादात्म्याभिमानं प्राप्तः सन्गतिं सर्वप्रपञ्चाती-तमोक्षरूपां स्थितिं न जानाति अतस्तत्साधन आदरं प-

रित्यज्य पुनः पुनः संसारापत्तिकारणानि कर्माण्येव करोतीति भावः ॥ ९ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ वैराग्यपीठिकार्थप्रकाशे कायविडम्बनार्थप्रकाशो द्वितीयः ॥ २ ॥

अथ वृत्तिविडम्बना ।

एवं शरी[illegible]दर्श्येदानीं तज्जीवनभूतवृत्तिदोषान्प्रदर्शयितुं वृत्तिविडम्बनाख्यं प्रकरणं सार्धद्विश्लोकमाह, तत्र प्रथमं क्षत्रवृत्तेर्दोषानाह पादेन ।

क्षत्रधर्मे परा हिंसा याच्ञायां लाघवं महत् ।
असत्यमेव वाणिज्ये नानृतात्पातकं परम् ॥ १ ॥

क्षत्रेति । क्षत्रधर्मे क्षत्रियकर्मणि परा हिंसोत्कृष्टा हिंसाऽस्ति अतोऽत्रासक्तिर्न योग्या, ननु ब्राह्मणजीविका निर्दोषेति चेत्तत्राह याच्ञायामिति, याच्ञायां भिक्षावृत्तौ महद्बहु लाघवमनादरणमस्ति, अतोऽनादरजन्यं दुःखमसह्यं तत्रेति भावः, तर्हि वैश्यवृत्तौ दोषो न स्यादिति चेत्तत्राह वाणिज्ये, व्यापारवृत्तावसत्यमेवानृतमेव केवलमस्ति, ननु असत्ये दुःखहेतुत्वं न प्रतीयत इत्याशङ्क्याहानृतान्मिथ्यावचनात्परमन्यदुत्कृष्टं पातकं पापं न नास्ति तदेव श्रेष्ठं पापमित्यर्थः, दुःखहेतोः पापस्य सत्वात्तत्रापि दुःखमस्तीत्याशयः ॥ १ ॥

ननु तर्हि शूद्रवृत्तिः श्रेष्ठा चेत्तत्राह ।

सेवायां परमं कष्टं मृत्कीटस्तु कृषीबलः ।
द्यूते सर्वस्वनाशः स्याच्चौर्ये राजभयं महत् ॥ २ ॥

सेवायामिति । सेवा शूद्रवृत्तिस्तस्यां परममुत्कृष्टं कष्टं दुःखं

-सिद्धमेवातः शूद्रवृत्तावप्यादरो न कार्य इति भावः, कृषिवृत्तावपि दोषं दर्शयति मृदिति, कृषीवलः कर्षको मृत्कीटो मृदि कीट इव सदा तिष्ठतीत्यर्थः, तुपदेन सर्ववृत्तिभ्योऽपि तत्र कृषिवृत्तौ दुःखाधिक्यं सूचितमिति ज्ञेयं, ननु द्यूतवृत्तिस्तर्हि समीचीना स्यात्तत्राह द्यूत इति, द्यूते द्यूतवृत्तौ सर्वस्वनाशः स्यात्स्त्रीधनगृहादिनाशः स्याद्भवेदतस्तत्रापि दुःखमेवेति भावः, चौरवृत्तौ तु तत्प्रसिद्धमेवेत्याशयेनाह चौर्य इति, चौर्ये चौरवृत्तौ महदतीव राजभयं राज्ञो भीतिरस्तीति शेषः ॥ २ ॥

नाकाशात्पतति द्रव्यं जीविका सुखदा कथम् ।

इति श्रीनरहरिविरचिते बोधसारे वैराग्यपीठिकाबन्धे वृत्तिविडम्बनाख्यं तृतीयं प्रकरणम् ॥ ३ ॥

नन्वेताभ्यः षड्वृत्तिभ्योऽन्या काचिद्वृत्तिराश्रयणीयेत्याशङ्क्याह नेति, द्रव्यं सर्वजीविकानिदानभूतं द्रव्यं धनमाकाशाद्वियत्तो न पतति न वर्षति एता वृत्तीर्विना न लभ्यत इति भावः, अतो जीविका जीवनहेतुभूतं द्रव्यं वस्तुमात्रमित्यर्थः, सुखदा सुखप्रापिका कथं केन प्रकारेण स्यान्न कथमपीत्यर्थः ।

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ वैराग्यपीठिकाबन्धार्थप्रकाशे वृत्तिविडम्बनार्थप्रकाशस्तृतीय ॥ १ ॥

अथ कामविडम्बना ।

एवं वृत्तिदोषान्प्रदर्श्येदानीं कामस्यैव सर्वसंसारमूलत्वं 'सोऽकामयत, कामो दाता कामः प्रतिगृहीते'त्यादि श्रुतिभ्यः प्रसिद्धमतस्तत्रासक्तिनिषेधार्थं तद्दोषान्दर्शयितुं का-

मविडम्बनाख्यं प्रकरणमारभते पञ्चभिः श्लोकैः, तत्र तावन्मनुष्येषु मनुष्यस्वभावमाच्छाद्य पिशाचस्वभावं क्रौर्यादिदोषरूपं पिशाचेभ्योऽप्यतिमलिनं प्रकटयति एवं रूपं कामदोषमाह।

चर्वयन्ति महामांसं गते प्राणे पिशाचकाः।
जीवत्परस्परं मांसं स्त्रीपुंसाश्चतुराननाः ॥ १ ॥

चर्वयन्तीति। पिशाचकाः पिशाचाः कप्रत्ययेन कामिपिशाचेभ्यः पिशाचेषु पिशाचत्वं न्यूनमेवेति सूचितं, ते प्राणे गते सति प्राणवियोगे जाते सति प्रेतानां महामांसं पुरुषादिमांसं स्वयमपि प्राणवियोगे जाते पिशाचत्वं प्राप्येत्यर्थोऽपि ज्ञेयः, चर्वयन्ति खादन्ति तत्तेषां स्वधर्मत्वान्न क्रौर्यं गणनीयमिति भावः, तेभ्यः पुरुषेषु कामिषु तदाधिकक्यं दर्शयति जीवदिति, स्त्रीपुंसाः स्त्रियश्च पुमांसश्च स्त्रीपुंसाः परस्परं मिथुनीभूयेत्यर्थः, जीवत्परस्परं जीवतामेव परस्परमन्योन्यमित्यर्थः, मांसं चर्वयन्ति खादन्ति। ननु परस्परमांसभक्षणे कृते कुतो न ज्ञायते मन्मांसं भक्षतीति, ज्ञाते च कुतो न निवारयन्तीत्याशङ्क्याह चतुराननाः भक्षणे चतुराण्याननानि मुखानि येषां ते, सर्वप्रयत्नैः संपादितानि प्राणवत्प्रियाणि धनान्येव मांसतुल्यानि वा परस्परदुःखपरिहारादिजीवनादिचिन्तया परस्परं मांसशोषणं भवति तदेव भक्षणमुपचर्यते, भक्षकत्वेपि परस्परं भक्षकत्वाप्रतीतिरेवाननानां चातुर्यमिति विवेकः, मनुष्यत्वं दूरीकृत्य पिशाचत्वं संपादितमित्ययं कामस्य महान्दोषो दर्शित इति ज्ञेयम् ॥ १ ॥

पुनरपि तदेव प्रकारान्तरेण दर्शयति।

नृदेहैर्निशि नृत्यन्ति श्मशानेषु पिशाचकाः।

विचित्रैरङ्गविन्यासैर्गृहेषु गृहमेधिनः ॥ २ ॥

नृदेहैरिति । पिशाचकाः पिशाचाः कप्रत्ययार्थस्तूक्त एव नृदेहैः स्वदेहैर्नृत्यं कर्त्तुं लज्जिता इव मनुष्यशरीराणि धृत्वेत्यर्थः, तत्रापि निशि रात्रौ तत्रापि श्मशानेषु अमङ्गलस्थानेषु शवदाहदेशेषु नृत्यन्ति नृत्यं कुर्वन्ति गृहमेधिनो गृहधर्मेषु हिंसाप्रायेषु शीलं येषान्ते तथोक्ताः कामिनः स्वदेहैरेव दिने रात्रौ च निर्लज्जा भूत्वा गृहेषु स्वस्थानेष्वेव विचित्रैर्भावहावविशिष्टैरङ्गविन्यासैर्हस्ताद्यङ्गस्थापनैर्नृत्यं कुर्वन्ति, अतः कामिनां पिशाचेभ्योऽप्यतितरामविवेकित्वं तत्कामस्यैव दोषजातमिति भावः ॥ २ ॥

एवं कामिषु पिशाचचेष्टानुकरणं प्रदर्श्येदानीं श्वचेष्टामपि तेषु दर्शयति ।

लिहति स्पृशति भ्रान्तो मुहुर्जिघ्रति खादति ।
ग्रामसिंहानुरूपेयं ग्राम्यधर्मव्यवस्थितिः ॥ ३ ॥

लिहतीति । यथा श्वा कश्चिदन्नमांसचर्मादिपदार्थं दृष्ट्वा भ्रान्तः सन्दिशि दिशि भ्रममाणः प्रथमतस्तं स्पृशति स्पर्शेन निश्चिनोति मुहुः पुनस्तत्र भक्ष्यं वाऽन्यत्किञ्चिदिति संदेहे जिघ्रति घ्राणेन निश्चिनोति तत्रापि संदेहे लिहति जिह्वया स्वादु वाऽस्वादु निश्चिनोति ततश्च निःसंदेहं खादति भक्षति, एवं श्वस्वभावव्यवस्था दृष्टैव सर्वैरित्यर्थः, एवमेव ग्राम्यधर्मव्यवस्थितिः कामवतां स्वभावव्यवस्थाऽपि । सेयं ग्रामसिंहानुरूपा शुनामेव योग्येत्यर्थः, एवं विपरीतस्वभावः कामकृत एवेति भावः ॥ ३ ॥

विषयेषु दुःखरूपेषु सत्स्वपि कामेन भ्रान्तानामेव तेषु सुखरूपत्वनिश्चयो भवतीत्याशयेनाह ।

कण्डूयनेन यत्कण्डूसुखं तत्किं भवेत्सुखम्।
पश्चाद्यत्र महापीडा तथा वैषयिकं सुखम् ॥ ४ ॥

कण्डूयनेनेति। कण्डूयनेन नखादिना घर्षणेन कण्डूसुखं घर्षणजन्यं सुखमिव यत्प्रतीयते तत्किं सुखं भवेन्नैव तत्सुखमित्यर्थः, कुतो न तत्सुखमित्यत आह यत्र घर्षणजन्ये सुखे पश्चाद्धर्षणानन्तरं महापीडा महतीव पीडा दुःखमस्ति तथा तद्वद्वैषयिकं विषयघर्षणजन्यं सुखं सुखमिव प्रतीयते परन्तु तद्दुःखमेव नाशरोगचिन्तादिदुःखैर्बहुभिर्व्यामिश्रत्वाद्विषसंपृक्तान्नं विषमिव तत्सुखं दुःखमेवेति भावः ॥ ४ ॥

स्त्रीषु तु स्वस्य पुनः पुनर्मारकत्वेनातीव शत्रुरूपत्वे सत्यपि मित्रबुद्धिस्तत्र कामकृतभ्रान्त्यैवेत्याशयेनाह।

नादासक्तं मृगं व्याधश्छिनत्ति निशितैः शरैः।
रूपासक्तं नरं नारी रतिच्छुरिकयाऽसकृत् ॥ ५ ॥

इति कामविडम्बना ॥ ५ ॥

नादेति। व्याधो मृगयुर्नादासक्तं मृग[illegible] लुब्धं मृगं हरिणं निशितैस्तीक्ष्णैः शरैर्बाणैश्छिनत्ति भिनत्ति तत्तु एकवारमेव नारी स्त्री रूपासक्तं स्वरूपलुब्धं नरं पुरुषं रतिच्छुरिकया रतिर्मैथुनमेव च्छुरिका क्षुरस्तयाऽस[illegible] च्छिनत्तीत्यहो व्याधादपि क्रूरत्वं स्त्रीणामतीवेति भावः ॥ ५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ वैराग्यपीठिकाबन्धार्थप्रकाशे कामविडम्बनार्थप्रकाशश्चतुर्थः ॥ ४ ॥

अथ क्रोधविडम्बना ।

एवं कामदोषान्प्रदर्श्येदानीं क्रोधेऽतिदुष्टत्वस्य सर्वजनप्रसिद्धत्वात्संक्षेपेण तद्दोषान्प्रदर्शयितुं क्रोधविडम्बनाख्यं प्रकरणमेकश्लोकमारभते राक्षसादप्यतिक्रौर्यं क्रोधवति दर्शयति ।

रुधिरं पिबति स्वीयं दिवा तमसि नृत्यति ।
भीषयत्यात्मनात्मानं क्रूरः क्रोधी न राक्षसः॥१॥

इति श्रीबोधसारे क्रोधविडम्बनाख्यं प्रकरणम् ॥ ५ ॥

रुधिरमिति । क्रोधी क्रोधवान्स्वीयं स्वकीयं रुधिरमसृक्पिबति प्राश्नाति, स्वीयदेहेपि निर्दयस्य परदेहे कुतो दयाशङ्केति भावः, 'स्वापत्यभक्षणं यत्र परापत्येषु कादये'ति न्यायाद्राक्षसस्तु परकीयं रुधिरं पिबति न स्वीयमतो दयासत्वात्कदाचिदपि परदेहेऽपि सा स्यादिति राक्षसे क्रौर्यन्यूनत्वमिति भावः, किञ्च क्रोधी दिवा दिवस एव तमसि अन्धकारे नृत्यति नृत्यं करोति क्रोधिनः प्रकाशरूपेऽपि दिनेऽन्धकारप्रतीतेरतीवाविवेकित्वं राक्षसे तु तमस्येव तमःप्रतीतेरविवेकस्य न्यूनत्वमिति भावः । किञ्च क्रोध्यात्मना स्वेनैवात्मानं स्वं भीषयति भयं प्रापयति राक्षसस्तु अन्यं भीषयति अतः स्वस्मिन्सदयत्वस्य विद्यमानत्वात्कदाचिदन्येष्वपि तत्ततः स्यात्क्रोधवति तु तदभावान्न तदाशङ्केति भावः, अतः क्रोध्येव क्रूरो निष्ठुरतरो न राक्षसो राक्षसस्तु क्रूरो न क्रूरतर इति भावः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ वैराग्यपीठिकार्थप्रकाशे क्रोधविडम्बनार्थप्रकाशः पञ्चमः ॥ ५ ॥

अथ लोभविडम्बना ।

एवं क्रोधदोषान्प्रदर्श्येदानीं लोभस्यैव सर्वमोक्षसाधनपरिपन्थित्वात्तस्य दोषान्विस्तरेण प्रदर्शयितुं लोभविडम्बनाख्यं प्रकरणमेकविंशतिश्लोकमारभते, तत्रादौ पिशाचादिभ्योऽपि बुद्धेरतिभ्रामकत्वं लोभे दर्शयति ।

न पिशाचा न डाकिन्यो न भुजङ्गा न वृश्चिकाः ।
संभ्रान्तयन्ति मनुजं यथा लोभो धियं रिपुः ॥१॥

नेति । पिशाचाः प्रेता न डाकिन्यो न भुजङ्गाः सर्पा न वृश्चिका न, एते सर्वेपि प्रत्येकं मिलिता वा मनुजं मनुष्यं संभ्रान्तयन्त्यपि तथा न संभ्रान्तयन्ति, तथा कथं, यथा येन प्रकारेण लोभो लोभाख्यो वृत्तिविशेषो धियं बुद्धिं संभ्रान्तयति तथा, अतः स एव रिपुः शत्रुतर इति भावः । मनुष्यपदेन वृश्चिकादीनां मनुष्यत्वबुद्धिमात्रभ्रामकत्वं न त्वन्यजन्मविषयबुद्धिभ्रामकत्वमतस्तेषु शत्रुत्वं प्रसिद्धमेव न शत्रुतरत्वं, लोभस्य तु केवलबुद्धिमात्रभ्रामकत्वेन जन्मान्तरविषयबुद्धिभ्रामकत्वसिद्धेः शत्रुतरत्वं गोश्वौ पशू इति न्यादिति भावः ॥ १ ॥

एवं लोभस्य शत्रुत्वं प्रदर्श्येदानीं शत्रुजयेच्छायां शत्रुजयोपायाश्चत्वारः सामदानभेददण्डाख्याः सन्ति, तेषु समञ्जसे शत्रौ सामोपयुज्यते लोभे त्वसामञ्जस्येन तस्यानुपयोगं निश्चित्य दानरूपोपायेन शत्रुं जिगीषुमालक्ष्य शिष्यं गुरुस्तदनुपयोगं दर्शयति ।

मेरवो घृतबिन्द्वाभा दुराशादावपावके ।
कथं सहस्रलक्षाद्यैस्तर्हि तृप्यतु लोभवान् ॥ २ ॥

मेरव इति । मेरवः कनकाचला अपरिमिता दुराशादाव-

पावके विषयाशैवारण्या[illegible]न्घृतबिन्द्वाभा घृतबिन्दुतुल्या भवन्तीत्यर्थः, तदा तर्हि लोभवान्स लोभो यस्मिन्विद्यते स पुरुषविशेषः सहस्रलक्षाद्यैः सहस्रलक्षादिसङ्ख्यापरिमितैर्द्रव्यै-रिति शेषः, कथं तृप्यतु तृप्तो भवेन्न कथमपीत्यर्थः, अतो दा-नरूपोपायोऽपि निरुपयोगीति भावः ॥ २ ॥

एवं लोभरूपशत्रुजये सामदानयोरनुपयोगित्वं प्रदर्श्याऽत्र भेदोपयोगं निश्चित्य तस्मिन्बलाबलविचारस्य कर्त्तव्यतायां तद्बलं दर्शयति ।

अनिद्रं प्रातरारभ्य जाग्रति स्वप्नपूर्ष्वपि ।
भ्रमन्नो लभते शान्तिं स लोभस्य पराक्रमः ॥३॥

अनिद्रमिति । अयं जीवः प्रातरारभ्य प्रातर्जागरणादा-रभ्याऽऽनिद्रं निद्रापर्यन्तं जाग्रति जागरावस्थायां भ्रमन्-भ्रान्तः सन्स्वप्नपूर्ष्वपि स्वप्ननगरेष्वपि अपिशब्दान्मनोरथादौ भ्रान्तः सञ्छान्तिं स्थैर्यसुखं नो लभते न प्राप्नोति तत्कारणं यत्स लोभस्य लोभरूपशत्रोः पराक्रमो बलं निश्चेतव्यम् ॥ ३ ॥

इदानीं मनुष्यत्वं दूरीकृत्य सर्पभूतादिस्वभावजननमपि लोभबलकृतमेवेत्याह ।

निधानं यक्षसर्पाद्या यदाक्रामन्ति यत्नतः ।
न पिबन्ति न खादन्ति तेषां हि गुरवः शठाः॥४॥

निधानमिति । ये यक्षसर्पाद्या यक्षाः प्रेतादयः सर्पाद्याः सर्पवृश्चिकादयो निधानं द्रव्यपूर्णं पात्रं दानभोगाद्यनुपयोगेऽपि आक्रामन्ति आक्रम्य तिष्ठन्ति यत्नतो यत्नेन न पिबन्ति न खा-दन्ति खानपानाद्युपायेन व्ययं न कुर्वन्तीत्यर्थः, तेषां मध्ये शठा

दानाद्युपयोगरहितधनरक्षका गुरवः श्रेष्ठाः, यद्वा तेषां गुरव उपदेष्टारस्तेषां पिशाचादीनां तथा धनरक्षणमेतस्माच्छिक्षितमिति तेषां न्यूनत्वमेतस्मादिति भावः, तेषां पिशाचादीनां ज्ञानाभावेऽनुपयोगितया द्रव्यरक्षणं न निन्द्यमिति ध्वनितं, मनुष्याणां तु तत्सत्वेऽपि पिशाचवत्तद्रक्षणं निन्द्यमेवेति पिशाचेभ्योऽपि निकृष्टत्वसम्पादनमिति लोभपराक्रमः सूचितः ॥ ४ ॥

इदानीं दानभोगहीनधनरक्षणं व्यर्थमेवेत्याह ।

दानभोगविहीनं च यदेव धनिनो धनम् ।
न तु तस्य मुखे धूलिर्दीयते भूमिगोपनैः ॥ ५ ॥

दानेति । दानभोगविहीनं दानाभावात्परलोकसाधकं न भवति भोगाभावादैहिकसुखासाधकं च भवति अतो यदुभयलोकासाधकं धनिनो धनवतो धनं द्रव्यमस्ति तुशब्देन तन्नास्त्येवेति सूचितं, ननु मरणसमये मुखे सुवर्णादि निक्षिप्यते प्रेतक्रियाश्च कुर्वन्ति पुत्रादयस्तदुपयोगित्वाद्धनरक्षणमुचितमेवेत्याशङ्क्याह नत्विति, तस्योक्तलक्षणस्य यक्षवित्तस्य मुखे तु आस्येऽपि भूमिगोपनैर्भूमिरक्षकैर्नृपैरित्यर्थः, धूलिर्द्रव्यसमीपवर्त्तिरजोऽपि द्रव्यकणगमनशङ्कया न दीयते दूरे क्रियायां धनस्योपयोगाशङ्केति भावः ॥ ५ ॥

ननु 'आपदर्थे धनं रक्षेदि'त्यादीनि नीतिवाक्यानि, 'सत्पात्रे स्थापितं द्रव्यं परलोकहितं भवेदि'ति, 'दृढे पात्रे तु निक्षिप्तं धनं भद्रं भवेदि'त्यादिवाक्यानि पण्डितजनमुखेन श्रुत्वा परलोकाय धनं दृढे ताम्रादिनिर्मितपात्रे निक्षिप्य भूम्यां स्थापयन्ति तद्धितमेवेति तत्कुतो निन्द्यत इत्याशङ्क्य तद्वाक्यतात्पर्यमज्ञात्वैव धनं द्रव्यं रक्षेद्यदि तर्हि तद्रक्षणं तद्धनं वाऽऽपदर्थे स्यात्-

स्वनाशायैव स्यात्। यद्वा धनं रक्षेच्चेद्रक्षणं न सम्भवति, कुतः! अर्थे धन आपन्नाशः स्यादेव, यद्वा धन आपन्नाशोस्ति अतस्तदायासं त्यक्त्वाऽऽत्मानमित्यपकृष्य तमेव रक्षेदित्यर्थः, सत्पात्रे तु श्रोत्रियत्वादिगुणविशिष्ट इत्यर्थः, अस्तदेव दृढं भूमिनिक्षेपणं तु सर्वजगदुत्पत्तिकारणभूम्यां निक्षेपणं ब्रह्मार्पणमित्यादिवाक्योक्तमेव विहितम्, इममर्थमज्ञात्वा केवलताम्रादिपात्रे द्रव्यनिक्षेपो मौर्ख्यविलसितमेवेत्याशयेनाह।

मूढस्ताम्रमये पात्रे संस्थापयति किं धनम्।
पात्रे स्थितं धनं भद्रं किन्तु पात्रं परीक्षय॥ ६॥

मूढ इति। मूढो मूर्खस्ताम्रमये ताम्रादिरचिते पात्रे भाण्डे धनं द्रव्यं स्थापयति स्थापनं करोति तत्किं न किमपि तदित्यर्थः, पात्रे स्थितं धनं भद्रं सत्पात्रे विद्यमानं द्रव्यं भद्रं सुखाय भवति तत्सत्यमुक्तं किं तु पात्रं सत्पात्रं परीयक्ष परीक्ष्य ज्ञातव्यमित्यर्थः॥ ६॥

इदानीं मानं शरीरसुखाशां च त्यक्त्वा याच्ञायै भ्रमणं गृहं गृहं प्रति लोभपराक्रमकृतमेवेति दर्शयति।

काकविष्ठाधनस्यार्थे कायक्लेशेन भूयसा।
मदान्धा धनिनः सेव्या महतीयं विडम्बना॥ ७॥

[illegible] । काकविष्ठाधनस्य वायसविष्ठा[illegible] धनस्याऽर्थे निमित्ते भूयसाऽधिकेन कायक्लेशेन शरीरजन्यक्लेशेन मदान्धा द्रव्यमदेनान्धा हिताहितज्ञानशून्या धनिनो धनवन्तः सेव्याः सेवितव्या इयमुक्तलक्षणा कदर्थना सद्धा सा म-

हत्यतीव विडम्बनाऽनार्यतैव सेत्यर्थः, इदमपि लोभपराक्रमकृतमेवेति भावः ॥ ७ ॥

न लोभस्योपचाराय मणिमन्त्रौषधादयः ।
मणिमन्त्रौषधश्लाघी सोऽपि लोभपरायणः ॥ ८ ॥

ननु लोभरोगनिवारण औषधाद्युपायोस्ति वा नवेति सन्दिह्यमानं प्रष्टुमिच्छन्तं शिष्यमालक्ष्याह नेति, लोभस्य लोभनाम्नो रोगस्योपचाराय निवारणाय मणिमन्त्रौषधादयो मणिश्च मन्त्रश्चौषधश्चादीनि येषां ते न न सन्ति, ननु लोभनिवारकं मण्यादिकं नास्तीति कुतोऽवगतमित्यत आह मणीति, यः कश्चिन्मणिमन्त्रौषधश्लाधी मणिभिर्मन्त्रौषधैश्च लाघत आत्मानं कत्थते सोऽपि असौ च लोभपरायणो लोभपर एव दृष्ट इति शेषः, अत एवावगतमिति भावः ॥ ८ ॥

इदानीं मनुष्येषु मनुष्यस्वभावं तिरस्कृत्य श्वस्वभावसम्पादनमपि लोभकृतमेवेत्याशयेनाह ।

किञ्चिद्धनकणं ध्यात्वा मुखमाढ्यस्य पश्यसि ।
करोषि श्वेव चाटूनि लोभेनापकृतं स्मर ॥ ९ ॥

किञ्चिदिति । यथा श्वा किञ्चित्स्वल्पं धनकणं स्वभक्ष्यकणिकां ध्यात्वा ममैतावत्प्राप्नुयादिति निश्चित्याढ्यस्य धनिनोऽन्नसमृद्धिमतो मुखमास्यं पश्यति अवलोकयति चाटूनि तद्रञ्जनार्थमुदरदर्शनपुच्छचालनपादप्रक्षेपणादीनि करोति तद्वत्किञ्चित्सर्वं द्रव्यं कोऽपि न ददाति तत्र ढब्बूकादिकणिकामात्रं ददाति न वा ददातीति जानन्नपि धनवतो मुखं प्रति पश्यसि प्रतीक्षां कुर्वन्नेव तिष्ठसि ततश्च तद्रंजनार्थं चाटूनि गायनहास्यविनोदशास्त्रचर्चानृत्यादिचेष्टाः करोषीत्ययं श्वस्वभाव-

स्त्वयि उत्तमं मनुष्यस्वभावं दूरीकृत्य सम्पादित एतल्लोभेनाऽपकृतं लोभनाम्ना शत्रुणाऽपकृतमपकारः कृत इति स्मर जानीहीत्यर्थः ॥ ९ ॥

इदानीं लोभनामनिरुक्त्याऽपि लोभप्रतापं सूचयति ।

लोहार्गलो भद्रहरो लोलताङ्को भयप्रदः ।
लुनात्युभौ च यल्लोकौ तेन लोभः प्रकीर्त्तितः॥१०॥

लोहार्गल इति । लोहार्गल आयसी शृङ्खलेव यत्र यत्र विषये लोभवतो बुद्धिः संलग्ना ततो विषयात्सा निर्गन्तुमस्वाधीनाऽतो लोभशृङ्खलया रुद्धाऽतो लोभस्य लोहार्गलत्वमत एव लोभनाम्नि लोकारस्य सिद्धिरिति भावः, किं च भद्रहरो भद्रस्य सुखस्य हरो नाशको यस्य बुद्धौ लोभस्तस्य सुखं नैव स्यादित्यर्थः, अतो लोभनाम्नि भकारसिद्धिर्ज्ञेया, किञ्च लोलताङ्को लोलता चाञ्चल्यं तदेवाङ्कं चिह्नं यस्य स यत्र यत्र सचेतनेषु चाञ्चल्यं लक्ष्यते तत्र तत्र लोभसत्वमनुमीयते ऽयं लोभवान् क्रियावत्वात्तद्वत् । ननु ज्ञानिष्वेतद्व्यभिचारः, न तत्रापि व्यवहारकाले तत्सत्वात्समाधिकाले तु व्यवहाराभावाल्लोभासत्वमिष्टमेव, ननु ज्ञानिनि तत्सत्वे तत्त्वमेव व्याहन्येत 'रागो लिङ्गमबोधस्ये'ति श्रुते रागवृत्तेर्विशेषस्यैव लोभत्वादिति चेन्न बाधितत्वेन तत्सत्वेप्यकिञ्चित्करत्वात् 'सन्तु रागादयो बुधे' इति शास्त्रान्तरेण तस्य तेष्वकिञ्चित्करत्वोक्तेः, 'जीवन्नाखुर्न मार्जारं हन्ति हन्यात्कथं मृत' इति न्यायेनाबाधकत्वसिद्धेश्च ज्ञानिषु तदबाधकत्वान्न ज्ञानित्वव्याहतिरत इदमनुमानमव्यभिचारि लोलताङ्क इति, अतोऽपि लोभनाम्नि लोकारसिद्धिर्ज्ञेया । किं च भयप्रदो यत्र यत्र भयं तत्रापि लोभसत्वमनुमीयतेऽतो

लोभनाम्नि भकारसिद्धिर्ज्ञेया, किञ्च यद्यतो लोभ उभौ लोका एतल्लोकपरलोकौ दानभोगाप्रवर्त्तकतया लुनाति खण्डयति नाशयति, ननु लुभधातुप्रकृतिकत्वे प्रसिद्धे लोभस्य कथं लूञ्प्रकृतिकत्वमुच्यते येन च्छिदिक्रियावत्वं स्यादिति चेन्न लुभधातोर्विमोहनार्थवत्वेन विमोहनस्य चोभयलोकघातकत्वप्रसिद्धेर्लोभशब्दस्यार्थतो लूञ्प्रकृतिकत्वात्तेन कारणेन लोभो लोभनाम्ना प्रकीर्तितः प्रसिद्धत्वेन प्रतिपादितः, एतेनाऽपि लोभप्रतापो ज्ञेय इति भावः ॥ १० ॥

एवं लोभरूपशत्रोर्बलं प्रतिपाद्यातिबलित्वे निर्णीते तज्जये भेदोऽपेक्षितः। स च द्विविधः, शत्रुबलन्यूनत्वसाधकदानसामोपायैस्तन्मन्त्र्यादिवशीकाररूप एकः, अपरः समाश्रयः। समाश्रयोऽपि द्विविधः श[1]त्रोरन्याधिकबलिसंश्रयः शत्रुसंश्रयश्च। तत्र दानसाम्नोरसामञ्जस्येन लोभरूपशत्रोस्तन्मन्त्र्यादिष्वपि तथात्वादनुपयोगः, अतः प्रथ[2]मानुपयोग एव। शत्रुसमाश्रयस्यापि तथैव दुःसाध्यत्वात्तमपि विहाय तदधिकबलसमाश्रयेण स जेतव्य इति तदधिकबलिजिज्ञासायां तद्दौर्लभ्यं परमयत्नादरार्थं दर्शयति।

सकामाः कामिनीलुब्धा निष्कामा मोक्षलोभिनः।
भावलुब्धो हि भगवान्निर्लोभोऽत्यन्तदुर्लभः॥११॥

सकामा इति। सकामाः कामेन सह वर्त्तमाना ये जगति प्रसिद्धास्ते कामिनीलुब्धाः कामिनीत्युपलक्षणं धनादिसर्वविषयाणामतस्तेषां लोभग्रस्तत्वं प्रत्यक्षमेवेति तदाश्रयोऽकिंचित्कर इति भावः, किञ्च निष्कामाः कामरहिता विरक्ता

(१) शत्रुतः। (२) प्रथमयोः सामदानयोः।

इत्यर्थः, ते मोक्षलोभिनो मोक्षे लोभो विद्यते येषां ते तथोक्ता अतस्तेषामपि समाश्रयो लोभशत्रुजयेऽप्रयोजक एवेति भावः। किञ्च हि प्रसिद्धो भगवान्षड्गुणैश्वर्योऽपीश्वरो भावलुब्धो भावे प्रेम्णि लुब्धो लोभी भवति अतस्तस्यापि लोभग्रस्तत्वमेवेति तदाश्रयो लोभनाशेऽकिञ्चित्कर एव तस्यापि तन्मूलकत्वादिति भावः, तर्हि निर्लोभो नास्त्येव किं तर्हि असाध्यलोभजयविचारेणेत्याशङ्क्याह निर्लोभो लोभरहितः केवलब्रह्मनिष्ठो जीवन्मुक्त इत्यर्थः, अत्यन्तदुर्लभोऽत्यायासैर्बहुसाधनैर्लभ्यः प्राप्यः स इति तत्प्राप्तिसाधनेषु दृढो भूत्वा प्रवृत्तिः कार्येति सूचितम्, अतः केवलं तदाश्रयेणैव स जेतुं शक्यो नान्यथेति भावः ॥ ११ ॥

ननु ईश्वरेऽपि लोभसत्वं कथं निश्चेयमित्याशङ्क्य तत्सम्भावनायै तद्विभूत्यां राजनि तं दर्शयति।

दुग्धफेनोज्ज्वला शय्या बाला चरणसेविनी ।
निद्रां न लभते भूपः परराष्ट्रजिगीषया ॥ १२ ॥

दुग्धेति । दुग्धफेनोज्ज्वला दुग्धफेनवत्कोमलस्पर्शा निर्मला च शय्या शयनसाधनं कशिपुयुक्तपर्यङ्को ऽस्तीति शेषः, बाला पूर्ववयस्का स्त्री चरणसेविनी पादसेवां कर्त्तुं विद्यते इति शेषः, एतादृशनिद्रासाधनानुकूल्येपि भूपः स्वीयराज्यलाभवानपीत्यर्थः, परराष्ट्रजिगीषयान्यराजदेशगृहणेच्छया निद्रां निद्रासुखं न लभते न प्राप्नोतीति लोभसत्वं तत्र प्रसिद्धमेवात एतादृशसर्वविभूतिमतीश्वरेऽपि लोभोऽस्तीति भावः ॥ १२ ॥

ननु निर्लोभस्यातीव दुर्लभत्वात्तदाश्रयं विना लोभजयासम्भवादस्तु स को बाधस्तेनेत्याशङ्क्य बुद्धेर्विपरीतकारित्वेन

लोभेऽनिष्टत्वमेव दर्शयतीतः परं द्वाभ्यां, तत्रादौ हितेष्वहितबुद्धिमहिते हितबुद्धिं जनयतीत्येवं बाधकत्वं लोभे दर्शयति ।

मार्गेषु मिलिताश्चौराः सख्यं तैः सह वर्धितम् ।
ते गता धनमादाय पश्चाच्छोचति मन्दधीः ॥१३॥

मार्गेष्विति । मार्गेषु प्रसिद्धपथिषु भवमार्गेषु च चौराः प्रसिद्धचौरा भार्यापुत्रादयश्च चौरसादृश्याच्चौरा मिलिताः सङ्गतास्तैः सह भार्यापुत्रादिभिश्चौरैश्च साकं सख्यं हितबुद्धित्वं वर्धितं वृद्धिं मापितं ततस्ते चौरा भार्यापुत्रादयोऽपि धनं भोगसाधनभूतं द्रव्यमादाय गृहीत्वा गता याताः पश्चादनन्तरं मन्दधीर्मन्दबुद्धिः शोचति शोकं करोति अयं बुद्धिविपर्यासो लोभकृत एवेति भावः ॥ १३ ॥

इदानीं स्वामिचौरयोश्चौरत्वस्वामित्वसम्पादनरूपं विपरीतकारित्वं लोभस्यैवेत्याशयेनाह ।

स्वामी तु चौरवद्द्रव्यं गोपायति यतस्ततः ।
भार्यापुत्रादयश्चौरा भुञ्जते स्वामिनो यथा ॥ १४ ॥

स्वामीति । स्वामी तु स्वाम्यपि स्वयं चौरवद्यथा चौरा इतस्ततो गोपायन्ति तथा द्रव्यं धनं व्ययभयाद्यतस्ततो गोपायति आच्छाद्य रक्षति न ददाति न भुनक्ति चेत्यर्थः, भार्यापुत्रादयः स्त्र्यपत्यादयश्चौरा धनहारित्वाच्चौरसादृश्याच्चौरा यथा यद्वत्स्वामिनः प्रकटं भुञ्जते तथा तद्द्रव्यं भुञ्जते भक्षणादिना हरन्ति एवं स्वामिनि चौरत्वं चौरेषु स्वामित्वं च विपरीततया लोभेनैव सम्पादितमिति भावः ॥ १५ ॥

तर्हि सर्वेभ्योऽपि धनं गोपनीयमेव नेत्याह ।

पुत्रमित्रकलत्रेभ्यो गोप्यते यद्धनं जनैः ।
तेन मन्येऽवनं पापं सुकृ[१]त्या गोप्यते नहि ॥१५॥

पुत्रमित्रेति। पुत्रमित्रकलत्रेभ्यः पुत्रान्मित्रात्कलत्राच्च जनैर्लोकैर्धनं द्रव्यं गोप्यते रक्ष्यते यद्यत इह लोकेपि सुखाभावादिति भावः, तेन कारणेनावनं रक्षणं धनस्येति शेषः, पापं पापमेव केवलं तद्, अतः सुकृती पुण्यकर्मा यः कश्चित्तेन न हि नैव गोप्यते रक्ष्यते ॥ १५ ॥

ननु विरक्तवेषा अपि मुखतश्च वैराग्योपदेष्टारो बहवो धन लुब्धा दृश्यन्ते तत्राह ।

रागिणी गणिका वित्तं यद्वाञ्छति वरा हि सा ।
धिकृतं वैराग्यवक्तारं वाचालं वित्तलम्पटम् ॥१६॥

रागिणीति। रागिणी रागवती प्रसिद्धैव गणिका वेश्या यद्धनादि वाञ्छतीच्छति सा वरा श्रेष्ठा प्रसिद्धरागत्वाद्वैराग्यवक्तारमन्येषां वैराग्योपदेष्टारं वित्तलम्पटमन्तर्धनलुब्धमत एव वाचालं निरर्थकवाक्यं तं धिग्धिक्कारोस्तु स चात्यधम इति भावः ॥ १६ ॥

ननु बहवः शास्त्रवक्तारोपि धनार्जनक्लिष्टास्तत्कुतो निन्द्यते भवद्भिस्तत्राह ।

धनिभ्यो धनमादाय श्लाघते शास्त्रपाठकः ।
बहुभ्यो मिथुनीभूय धनिभ्यो गणिका यथा ॥१७॥

धनिभ्य इति। बहुभ्योऽनेकेभ्यो धनिभ्यो धनवद्भ्यो मिथुनीभूय रतिं कृत्वा धनं द्रव्यमादाय गृहीत्वा गणिका वेश्या

---

(१) पाठे समर्पणेन।

यथा यद्वच्छ्लाघते कत्थते ऽहमेव धनवती स्वरूपवती चातुर्यवती चेति आत्मानं प्रशंसतीत्यर्थः, तथा तद्वच्छास्त्रपाठकः शास्त्रवक्ता बहुभ्यो धनिभ्यो धनवद्भ्यस्तत्तद्रञ्जनं कृत्वा धनमादाय द्रव्यं सम्पाद्य श्लाघतेऽहमेव पण्डितः मयैतावद्द्रव्यं सम्पादितं कोन्यो मत्सदृशोस्तीति कत्थते कामिषु वेश्यातुल्य एव स इति भावः ॥ १७ ॥

ननु वेदान्तवक्तारोऽपि धनलुब्धा दृश्यन्ते तत्राह ।

न शोभते तथैवायं लोभी वेदान्तवाचकः ।
चौर्येण निगडे दत्तो जटाभस्मधरो यथा ॥१८॥

नेति। यथा यद्वज्जटाभस्मधरः शिरसि जटाजूटधारि अङ्गे च विभूतिधारि एवं वैराग्यवेषवानपि चौर्येण तस्करकर्मणा निगडेऽवरोधककाष्ठे दत्तोऽर्पितः स न शोभते तथैव तद्वदेवायं भवदुक्तो वेदान्तवाचको वेदान्तवक्ता लोभी लोभवान्न शोभते शोभां न प्राप्नोतीत्यर्थः, उभयो र्विरोधादिति भावः ॥ १८ ॥

ननु धनं विना गौरवं लोके न स्यादिति तदर्थं तत्सम्पाद्यं विदुषामित्याशङ्क्याह ।

यदि वित्तार्जनेनैव विद्वांसो यान्ति गौरवम् ।
कस्तर्हि वेश्याविदुषोर्विशेष इति वर्णय ॥ १९ ॥

यदीति। विद्वांसः पण्डिता वित्तार्जनेनैव द्रव्यसम्पादनेनैव केवलं गौरवं प्रतिष्ठां यान्ति प्राप्नुवन्ति यदीति यर्हि सम्भाव्यते त्वया तर्हि तथा सति वेश्याविदुषोरुभयोर्ज्ञाने समाने सति को विशेषो भेद इति तद्वर्णय कथय तस्माद्विदुषां विद्ययैव गौरवं तद्धनकृतमिति ज्ञानं भ्रमएवेति भावः ॥ १९ ॥

ननु मुखेनानित्यतां प्रतिपादयन्तः पुनस्तानेव सेवमाना अपि बहवो दृश्यन्ते तत्राह ।

अनित्यमिति यो वक्ति सेवते नित्यमेव तत् ।
बहिर्मुखस्य तस्यास्यं मा दर्शय महेश्वर ॥ २० ॥

अनित्यमिति । हे महेश्वर हे परमेश्वर यः कोऽपि ज्ञानिमन्योऽनित्यं नाशवत्सर्वमिदमिति एवं वक्ति ब्रूते परन्तु तदनित्यवस्तु नित्यमेव सर्वकालमपि सेवते भुनक्ति तस्य बहिर्मुखस्य विरक्तापसदस्यान्तर्विषयिण आस्यं मुखं मा दर्शय न दर्शनं भवेद्यथा तथा कुरु तादृशस्य मुखदर्शनमपि न कर्त्तव्यमिति भावः ॥ २० ॥

एवं लोभबलं प्रदर्श्य तदधिकबलब्रह्मनिष्ठदौर्लभ्यप्रदर्शनेन तदाश्रये साधनात्यादरं विधाय तत्समाश्रयेण स जेतव्य इति ज्ञापयित्वेदानीं शत्रुसमाश्रयपक्षे दोषप्रदर्शनपूर्वकं तज्जये च फलं दर्शयति ।

कामकिंकरतां प्राप्य सकामाः सर्वकिंकराः ।
कामेनैव परित्यक्तो निष्कामः कस्य किंकरः ॥२१॥

इति श्रीनरहरिविरचिते बोधसारे वैराग्यपीठिकाबन्धे
लोभविडम्बना ॥ ६ ॥

कामेति । कामकिंकरतां काम्यन्ते विषया अनेनेति कामो लोभस्तस्य किंकरतां सेवकत्वं प्राप्य लोभसमाश्रयं कृत्वेत्यर्थः, सकामाः सर्वविषयेच्छावन्तो जायन्त इति शेषः, ततश्च सर्वकिङ्कराः सर्वसेवकत्वमङ्गीकार्यं महाननर्थोयं लोभसमाश्रय इति भावः; अतो निर्लोभसमाश्रयेण तज्जये तु कामेनैव परि-

त्यक्तः कामो लोभस्तेन परित्यक्तो लोभनाशेन तद्धीनः पुरुषो निष्कामः स कस्य किङ्करो न कस्यापि किङ्कर इति स्वाराज्यसिद्धिफलं वर्शितम् ॥ २१ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ वैराग्यपीठिकाबन्धार्थप्रकाशे लोभविडम्बनार्थप्रकाशः षष्ठः ॥ ६ ॥

अथ कर्मविडम्बना ।

एवं लोभदोषान्प्रदर्श्य तन्मूलककाम्यकर्मदोषान्दर्शयितुं कर्मविडम्बनाख्यं प्रकरणं चतुर्दशश्लोकमारभते, तत्रादौ कर्मणोऽपूर्णतया श्रमहेतुत्वादनादरणीयत्वमाह ।

वंशपात्रमिवापूर्णं पूर्णं घटशतैरपि ।
क्रियाजालं कथं साधो विरागाय न जायते ॥२२॥

वंशेति । हे साधो क्रियासाधनपर घटशतैरपि घटपदेनात्र तत्परिमितं जलं ग्राह्यं लक्षणया 'भावानयने द्रव्यानयनमि'ति न्यायेन वा शतपदं चात्रासंख्यातपरमसंख्यघटजलैरित्यर्थः, पूर्णमपि अपूर्णं वंशपात्रमिव वंशशकलनिर्मितभाण्डमिव क्रियाजालं कर्मरूपं जालमिव स्वबन्धकारणं विरागाय विरागं जनयितुं कथं कुत इत्यर्थः; न जायते न भवति बन्धनहेतुत्वाच्छ्रमहेतुत्वाच्च विरागयोग्ये कर्मणि रागोऽहोऽन्तःकरणमौढ्यमेतदिति भावः ॥ १ ॥

ननु कृते च कर्मणि पूर्णता स्यादित्याशङ्क्याह ।

ब्रह्मणो दिनमारभ्य यावदद्य कृताः क्रियाः ।

मुहूर्त्तं हन्त संसारी नैव निश्चिन्तताङ्गतः ॥ २ ॥

ब्रह्मण इति । ब्रह्मणोऽजस्य दिनं दिनादारभ्य प्रारम्भं कृत्वाद्य यावदद्यपर्यन्तं क्रियाः कर्माणि कृताः कृतानि तेषु कृतेष्वपि मुहूर्त्तं क्षणमात्रं संसारी जीवो निश्चिन्ततां चित्तस्थैर्यजन्यं सुखं नैव गतो नैव प्राप्तो हन्त इति खेदे तत्पूर्णताशाऽद्यापि तव वर्त्ततेऽयं मम खेदो भवतीति भावः ॥ २ ॥

ननु पुत्रात्सुखं स्यादिति प्रसिद्धिर्लोके 'नापुत्रस्य लोकोऽस्ती'ति श्रुतेः, पुत्रं विना परलोकासिद्धेः श्राद्धादिकर्मणा च पुत्रकृतेन परलोकसुखसिद्धेः तज्जननोपयोगि विवाहादि कर्म कार्यमेवेत्याशङ्क्य तत्रापि साम्ना दोषं दर्शयति त्रिभिः । तत्रादौ पुत्रदत्तपिण्डोपजीवनं पराधीनजीवनत्वाद्दौर्भाग्यमेवेत्याह ।

अभाग्यं परमं पुंसां परपिण्डोपजीवनम् ।
तत्कथं नाम सौभाग्यं पुत्रपिण्डोपजीवनम् ॥३॥

अभाग्यमिति । पुंसां पुरुषार्थिनां दृष्ट्येति शेषः, परपिण्डोपजीवनमन्याधीनान्नादिनाऽऽयुः क्षपणमात्रं तज्जीवनमिह लोके परलोके च सुखासाधकत्वात्तत्परमं केवलमभाग्यमेव दौर्भाग्यमेव प्रसिद्धमिदं लोकेऽपि तत्तस्मात्पुत्रपिण्डोपजीवनं पुत्रदत्तपिण्डादिना परलोक इहापि पुत्रादेः पिण्डस्य शरीरस्यार्थे पुत्राद्यर्थशरीरेण वोपजीवनं पराधीनमेव नाम प्रसिद्धं चेदं कथं केन प्रकारेण सौभाग्यं संपन्नत्वं न कथमपि परमं दारिद्र्यमेव तदिति भावः ॥ ३ ॥

तत्र प्यतीवानादरेण दत्तान्नादिना जीवनं त्वतीव दुःखास्पदत्वादतीव दौर्भाग्यमेवेत्याशयेनाह ।

मृतशब्देन सम्बोध्य मृतपिण्डं मृताहनि ।
मृताय दास्यते पुत्रस्तद्वरं किमुतामृतम् ॥ ४ ॥

मृतशब्देनेति । मृतशब्देन मृतस्य शब्देन प्रेत इति नाम्ना सम्बोधनं कृत्वा हे प्रेतेति, इदानीमपि यस्य कस्यापि त्वं प्रेतोऽसीत्युक्ते दुःखं मन्यते स तर्हि कथं तत्तव तदा सुखकारकं स्यादिति भावः, पुत्रः स्वपालकस्य यस्य कस्याप्येतादृशं वचनं दुःसहं तत्किं वाच्यं स्वपाल्यस्य पुत्रस्य तादृशं वचनं दुःसहमिति भावः । मृतपिण्डं मृतिनिमित्तं पिण्डं मृतमेव पिण्डं शरीरमिति वा मृतशरीरोत्पादकत्वात्पिण्डस्येति भावः, मृतेरप्रियत्वात्तन्निमित्तकपिण्डस्यापि दुःखकारणत्वं मृतशरीरमपि कस्यापि न रोचते तत्कथं मृतशरीरोत्पादकः पिण्डः सुखदः स्यादिति भावः, मृताहनि मृतदिने मृतदिने मृतसम्बन्धिनामपि दुःखेनान्नाद्यरुचिर्दृश्यते मृतस्य तर्हि मूर्च्छावत्त्वादन्नादिभोगो दुर्घटस्तत्किं पुनस्तस्याप्यरुचिरन्नादिष्विति वक्तव्यमिति भावः । तत्रापि मृताय मरणमूर्च्छिताय दास्यतेऽर्पयिष्यति भविष्यदर्थेन दानप्रयोगेण तदपि बुध्यादिचाञ्चल्येन मरणादिना पुत्रस्य स्यान्नवेति तत्र निश्चयाभावः सूचित इति ज्ञेयम्, तत्तादृशपुत्रादिसंपादनेन मृत्वा तद्दत्तपिण्डादिना जीवनं वरं श्रेष्ठं किमुत किं वाऽमृतं मोक्षसुखं वरं श्रेष्ठमित्येवं विचार्यतामित्यर्थः ॥ ४ ॥

शास्त्रतोऽपि श्राद्धादिभोजनं निन्द्यमित्याशयेनाह ।

अशनायां पिपासां च शोकं मोहं जरां मृतिम् ।
प्राप्नुवञ्छ्रुतिशास्त्रेभ्यो मा भव श्राद्धभक्षकः ॥५॥

अशनायामिति । त्वमशनायां रोगादिना भक्षितान्नादेर्भस्मीभावेन पुनः पुनर्भोक्तुमिच्छामन्नाद्यप्राप्त्या बहुबुभुक्षुलमि-

त्यर्थः, पिपासां च तृड्बाहुल्यमपि शोकमाधिं मोहं कर्त्तव्या- स्फुरणरूपां स्तब्धतां जरामकाले तु धातुक्षीणत्वादिना वा- र्धक्यं मृतिमकालमृत्युमित्यादिफलानि श्रुतिभ्यः 'श्राद्धीयमन्नं भुञ्जनप्रेतोशनायातृट्शोकजरामूर्च्छाकालमृत्युभ्यः शङ्कमानो जीवन्नेव मृतो न तत्समश्नीयादि'त्यादिभ्यः श्रुतानि, शास्त्रे- भ्योपि कर्मविपाकादिभ्यः श्रूयन्तेऽतस्तानि प्राप्नुवन्नङ्गी- कुर्वन्सञ्छ्राद्धभक्षकः पुत्राद्युत्पादनेन तत्कृतश्राद्धभोजनेप्सुर्मा भव न भवितव्यं निन्द्यत्वादेतदयोग्यमिति भावः ॥ ५ ॥

ननु मास्तु पुत्राद्युत्पादनादिश्राद्धान्तं कर्म, ऐहिकसुखभो- गहेत्वायुर्वर्धायकं तु कर्म कर्त्तव्यमेवेत्याशङ्क्य तत्रापि दोषं दर्शयति।

दीर्घमायुर्जराभुक्त्यै धनं भूरि दुराधये ।
पुत्राः कलहदुःखाय संसारे दुःखमद्भुतम् ॥ ६ ॥

दीर्घमिति । दीर्घं बहुकालमायुर्जीवनं जराभुक्त्यै सर्व- लोकतिरस्कार्यं स्वस्य चानपेक्ष्यमशक्त्यादिदोषवत्वाद्वृद्धत्वं तद्भोगाय तस्य भोगं कर्त्तुं तत्स्यादतस्तत्साधककर्मण्यादरो न युक्त इति भावः, ननु धनस्य सर्वविषयभोगहेतुत्वेन सुखहे- तुत्वात्तत्साधनभूते कर्मण्यादरो विधेय इत्याशङ्क्याह धन- मिति, भूरि बहु धनं द्रव्यं दुराधये चिन्तायै स्याद्, भूरिपदे- नात्र जीवनमात्रकारणभूतं धनं तु जीवनकारणप्रारब्धेनैव स्या- त्तद्विशेषभोगार्थं तु विशेषकर्मणेति तदर्थं कर्मण्यादरो न कर्त्त- व्य इति सूचितं ज्ञेयम् । ननु पुत्राणां पारलौकिकसुखहेतुत्वाभा- वेप्यैहिकसुखहेतुत्वेन तत्साधककर्मण्यादरो युक्त एवेत्याशङ्क्याह

पुत्राइति, पुत्रा अपत्यानि कलहदुःखाय स्वे- प्सितादाने स्वेन सह स्वधनार्थं तेषां वा परस्परेण सह यः

कलहो विग्रहस्तद्वारा दुःखं जनयितुं स्युः, अतस्तदर्थकर्मण्यादरो न युक्त इति भावः; ननु सर्वेप्येते दुःखदा एवेति कुतो न-ज्ञायते सर्वैरित्याशङ्क्याह संसार इति, संसारेऽसारेपि संसारनाम्नि दुःखं दुःखमपीत्यर्थः, अद्भुतमत्याश्चर्यरूपमित्यर्थः, असारत्वेपि संसारत्वप्रतीतौ दुःखे सुखप्रतीतिर्युक्तैवेति भावः॥६॥

ननु रूपसाधने तर्हि कर्मण्यादरोस्तु तत्राह।

छायां पश्यति कायस्य रायो गर्वेण मुह्यति।
जायां भजति भावेन मायां नो वेद वैष्णवीम् ॥७॥

छायामिति। कायस्य शरीरस्य च्छायां प्रतिरूपं दर्पणादौ पश्यति अवलोकयति ततस्तत्र सुन्दरत्वं यत्प्रतीयते तद्रायो द्रव्यस्य न तु देहस्य तथैव तत्सुन्दरत्वं स्वदेह आरोप्य गर्वेण सुन्दरोहमित्यभिमानेन मुह्यति तदासक्तिं करोति अतो विमोहकत्वाद्रूपस्य तत्साधनभूते कर्मण्यादरो न कर्त्तव्य इति भावः, एवं भार्यासाधनभूतं कर्म त्याजयितुं भार्यायामपि दोषं दर्शयत्यर्धेन जायामिति। जायां जायते स्वयं पुत्ररूपेण पतिरूपेण च यस्यां सा जाया माता तां भावेन भार्याबुध्या भजति भुनक्ति अहो अन्याय इत्यर्थः। ननु मातरि भार्याबुद्धिः कथं स्यादित्याशङ्क्याह। मायामिति वैष्णवीं विष्णुसम्बन्धिनीं मायामघटितघटनाचातुरीं नो वेद न जानाति 'तज्जाया जाया भवति यदस्यां जायते पुनरि'ति श्रुतेः, तस्यां पुत्ररूपेणोत्पन्नत्वाद्भार्याया मातृत्वं प्रसिद्धं प्रमाणसिद्धमेव युक्त्यापीदं स्वस्यापि पतिरूपेण तस्यामेवोत्पन्नत्वासम्भावनीयं मायापदेनापि मायाया विपरीतकारित्वं प्रसिद्धमेवेति सूचितं, वैष्णवीमिति पदेन च विष्णोर्जगत्स्थापकत्वात्तस्येयं स्त्रीरूपा मायैव मूर्त्तिमती सा

स्वं रूपं तिरस्कृत्य विपरीतबुद्धिमुत्पाद्य स्वासक्तं पुरुषं करोति तेन च जगत्स्थितिनिर्वाहो जायत इति सूचितम् ॥ ७ ॥

अतः सर्वत्र स्त्रीपुत्रादिषु ममता त्याज्येत्याह ।

यात्रासमागमसमे नतर्कितगतागते ।
पशुपुत्रकलत्रादौ ममता न मता समा ॥ ८ ॥

यात्रेति । यात्रासमागमसमे यथा यात्रायामपि असम्बन्धिनां समागमः संगो जायते तत्तुल्ये नतर्कितगतागते नतर्किते तर्कागोचरे गतागते संयोगवियोगौ यस्मिन्स्तादृशे पशुपुत्रकलत्रादौ पशवस्तुरगगजादयः पुत्राश्च कलत्रं स्त्री चादयो यस्मिन्तस्मिन्सर्वस्मिन्ममताऽऽसक्तिः समा सुखदा न मता न संमता मुनिभिरिति शेषः, तदासक्तिर्न कार्येति भावः ॥८॥

तर्हि सा ममता कथं त्याज्येत्याशङ्क्य गुरुसेवां विना न त्यक्तास्यादित्याशयेनाह ।

सुतरां गुरवोऽस्माकं वैयाकरणसत्तमाः ।
आदिश्य ममतास्थाने समतां साधयन्ति ये ॥९॥

सुतरामिति । अस्माकमस्मदृष्ट्या गुरवो दैशिका वैयाकरणश्रेष्ठाः सुतरामत्यन्तं ज्ञेयाः, किं तद्गुरूणां वैयाकरणश्रेष्ठत्वं तदाह ये गुरवो ममतास्थाने ममतारूपे समतां समतारूपमादिश्यादेशं कृत्वा साधयन्ति, इदमेव वैयाकरणश्रेष्ठत्वं गुरूणामिति भावः ॥ ९ ॥

ननु स्त्रीपुत्रादित्यागो दुष्कर इत्याशङ्क्याह ।

त्यक्ष्यंत्य मां च त्वान्त्वं च त्यक्ष्यसि यानपि ।

येषां त्यागे महत्सौख्यं तेषां त्यागेऽपि कः श्रमः॥१०॥

त्यक्ष्यन्तीति । ये च विषयास्त्वां तदासक्तमपि त्वामवश्यं निश्चयेन त्यक्ष्यन्ति परित्यज्य गमिष्यन्ति त्वं च त्वमपि यानपि पुत्रादिविषयानपि त्यक्ष्यसि परित्यज्य गमिष्यसि स्वमरणकालेऽवश्यभाविवियोगकाले वेत्यर्थः, किञ्च येषां विषयाणां स्वतस्त्यागे कृते सति महदतीव सौख्यं सुखं भवति तेषां विषयाणां त्यागेऽपि त्यागनिमित्तकः कः श्रमः किं दुःखं जायते प्रत्युत सुखेनैव भाव्यमिति भावः ॥ १० ॥

ननु विषयत्यागेन वैराग्ये क्रियमाणे सुहृज्जनकृतनिन्दा दुःसहेत्याशङ्क्याह ।

व्यवहारविमूढानां स्तुतिनिन्दामयः क्रमः ।

सोपि तत्कायपर्यन्तः कायः कतिदिनान्वयी ॥११॥

व्यवहारेति । व्यवहारविमूढानां व्यवहारेपि ये विमूढा विशिष्टा मूर्खा व्यवहारेप्यर्थसाधनं तेषां न स्यादिति भावः, व्यवहारेऽपि स्तुतिनिन्दयोः सत्वात्तत्र च निन्दाभयेन व्यवहारलोपः प्रसज्येतातस्त उभयज्ञानशून्यास्तेषां स्तुतिनिन्दामयः क्रमः स्तुतिः प्रशंसा निन्दा जुगुप्सा च तत्प्रचुरः क्रमो व्यवहारो न तूभयज्ञानिनां स्तुतिर्निन्दा चेति स्वकार्यपरत्वमेव तेषां व्यवहार इति भावः, अतः स्वकार्यपरत्वमेव तवोचितमिति सूचितं, तथापि न सहते चेत्तत्राह सोपीति, सोपि स्तुतिनिन्दामयक्रमोपि तत्कायपर्यन्तस्तेषां सम्बन्धिशरीरपर्यन्तमेव, अतः स कायस्तत्सम्बन्धि शरीरं कतिदिनावयी कतिदिनपर्यन्तं तव सम्बन्धी स्यात्, शरीरपर्यन्तं निन्दा सह्या परन्तु 'स्वकार्यं साधयेद्धीमा-

नि'ति नीतिवाक्येन स्वकार्यपरस्यैव धीमत्वप्रतिपादनात्तव स्वकार्यपरतैव योग्येति भावः ॥ ११ ॥

एवं नीतिं प्रदर्श्य विषयासक्तौ भयमपि दर्शयति।

एकतः सकला लोका विकर्षन्ति यथाबलम्।
पदार्थमालां बलवानेकः कालो गिलत्यसौ ॥१२॥

एकत इति। सकलाः सर्वे लोका जीवाः पदार्थमालां विषयस्रजं यथावलं बलमनतिक्रम्य स्वस्वशक्त्यनुसारेणेत्यर्थः, एकत एकदेशेन विकर्षन्ति स्वस्वाभिमुख्येन ममैवेयमिति स्वीकुर्वन्तीत्यर्थः, अन्यत्र देश एकोऽसहायी बलवान्महाबलः कालः सर्वजगत्कलनसमर्थ ईश्वरस्ताङ्गिलति ग्रसति असौ, विषयासक्त्या कालमुखे न गन्तव्यं तत्र [illegible]तो भवेति भावः ॥ १२ ॥

ननु यावद्विषयभोगसुखहेतुत्वाद्विषयाणां कुतस्त्याज्यत्वमित्याशङ्क्य तत्र विषयाणं वृत्तीनां भोक्तुश्च क्षणिकत्वेनान्योन्याभावे जीवनस्यैव भावः कुतो भोगजन्यसुखाशङ्केत्याशयेनाह।

लोला लक्ष्मीर्वयं लोला लोला विषयवृत्तयः।
किं सुखं तत्र यत्राङ्ग जीवनस्यैव संशयः ॥१३॥

लोलेति। लक्ष्मीर्विषयभोगसंपत्तिर्लोला चञ्चला क्षणिकेत्यर्थः, वयमस्मदादयो भोक्तृत्वाभिमानिनो लोलाः क्षणिका विषयवृत्तयो विषयाकारान्तःकरणवृत्तयो भोगसाधनभूता लोलाः क्षणिकाः, एवं सर्वेषां क्षणिकत्व उत्तरोत्तरक्षणेऽभावसत्वादन्योन्यत्राभावे सिद्धे यत्र विषयवृत्तौ भो-

क्तरि च भोग्येपि जीवनस्यैव केवलसत्वस्यैव संशयोऽस्ति न वेति सन्देहस्तत्र विषयभोगे किं सुखं सुखसत्वं कुतो निश्चेयं यत्रासक्तिः स्यादिति भावः ॥ १३ ॥

इदानीं तत्र क्षणिकसुखेपि अनेकदुःखमिश्रितत्वेन दुःखरूपत्वमेवेति तदासक्तिर्न कार्येति सिद्धान्तयन्नुपपादितमर्थमुपसंहरति ।

शोकमोहौ भयं दैन्यमाधिर्व्याधिः क्षुधा तृषा ।
इत्यादि विविधं दुःखमिति संक्षेपकीर्त्तनम् ॥१४॥

इति बोधसारे वैराग्यपीठिकाबन्धे कर्मविडम्बना समाप्ता ॥ ७ ॥

शोकेति । शोकमोहौ शोको गतार्थगुणचिन्ताजन्यं दुःखं मोहो दुःखेन कर्त्तव्याकर्त्तव्यविस्मृतिर्भीतिः प्रसिद्धा दैन्यं स्वविषयालाभजन्यं दुःखमाधिः संकल्पजनितदुःखप्रतीतिर्व्याधिर्ज्वरादिरोगजनितपीडा क्षुधा बुभुक्षाजनितदुःखप्रतीतिस्तृषा पिपासाजनितपीडेत्यादि एतदादि विविधमनेकप्रकारं दुःखं तत्र सुखाभासेऽस्ति दुःखमिश्रितत्वेन तत्सुखं दुःखमेव विषमिश्रितान्नं विषमिवेति भावः, संक्षेपकीर्त्तनं विषयदोषाणां संक्षेपतो निरूपणमिति समाप्तमित्यर्थः ॥ १४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ वैराग्यपीठिकाबन्धार्थप्रकाशे कर्मविडम्बनार्थप्रकाशः सप्तमः ॥ ७ ॥

अथ धर्मजिज्ञासा ।

एवं सर्वविषयदोषान्प्रदर्श्य तत्र कर्मविडम्बनायां कर्मणां त्याज्यत्वे सर्वकर्मणां त्यागेन मुमुक्षूणां चित्तशुद्धिर्न स्यादिति ग्राह्यं कर्म ग्राहयितुं धर्मजिज्ञासामारभत एकोनत्रिंशद्भिः श्लोकैः,

तत्रावान्तरप्रकरणानि धर्मजिज्ञासा तपस्यातात्पर्य व्रतव्यवस्था वेषविचार मौनमीमांसा दानज्ञान तीर्थतत्वा चारचातुर्याख्यान्यष्टौ सन्ति तानि क्रमतो व्याख्यास्यामः, तत्रादौ धर्मजिज्ञासाप्रकरणमेकादशश्लोकं व्याख्यायते, तत्र तावद्धर्मजिज्ञासानिरूपणं सभेदं प्रतिजानीते ।

अथातो धर्मजिज्ञासा धर्मः प्रोक्तश्चतुर्विधः ।
नित्यो नैमित्तिकः काम्यः प्रायश्चित्तमिति क्रमात् ॥ १ ॥

अथेति । अथ वैराग्यनिरूपणानन्तरं यतो ग्राह्यत्याज्यधर्मज्ञानं विना ग्राह्यधर्मसंग्रहो न स्यात्तेन विना मुमुक्षोश्चित्तशुद्धिर्नस्या'त्तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेने'त्यादि श्रुतेः, कर्मणां शुद्धिद्वारा वेदनेच्छाजनकत्वं श्रुतं, वक्ष्यति हि वेदनेच्छा वेदनं वा चित्रा सत्कर्मणां गतिरि'ति, अतः कारणाद्धर्मजिज्ञासा धर्मस्य जिज्ञासा ज्ञानेच्छा कर्त्तव्येति शेषः । तस्यां च कर्त्तव्यायां सत्यां शिष्यं प्रति धर्मं ज्ञापयितुं तद्भेदमाह धर्म इति, धर्मो विहितधर्मरूपश्चतुर्विधश्चतुःप्रकारः प्रोक्तः कथितो मन्वादिभिरिति शेषः, चातुर्विध्यमेव दर्शयति नित्य इति, नित्यो एको नैमित्तिको निमित्तादुत्पन्नो द्वितीयः काम्यः कामनानिमित्तस्तृतीयः प्रायश्चित्तं प्रायश्चित्तनामा चतुर्थ इति एवं क्रमात्क्रमेण स चतुर्विधो ज्ञेयः ॥ १ ॥

तत्रादौ नित्यधर्मं लक्षयत्येकेन ।

वर्णाश्रमसमाचाराः शौचस्नानादयश्च ये ।
आवश्यकास्ते नित्याः स्युरकृत्य प्रत्यवैति यान् ॥ २ ॥

वर्णेति । ये धर्मा वर्णाश्रमसमाचारा वर्णानां ब्राह्मणादीनामनुलोमादीनां चाश्रमाणां ब्रह्मचारिगृहस्थवानप्र-

स्थयतीनां समाचाररूपा विविक्ता आचाररूपाः शौचस्नाना-दयश्च शौचमान्तरं रागत्यागरूपं बाह्यं स्नानादिरूपं देहमल-त्यागरूपमेते आदिनी येषां संध्यावन्दनादीनां ते तथोक्ताः, सा-धारणलक्षणमाह आवश्यका इति, आवश्यका यैर्विनेह लोके परत्र वा भ्रष्टाः स्युस्ते, तानेव स्पष्टमाह यान्धर्मानकृत्य न कृत्वा प्रत्यवैति प्रत्यवायो दोषस्तद्वान्भवति ते धर्मा नित्याः स्युर्भवेयुः ॥ २ ॥

नैमित्तिकाँल्लक्षयत्येकेन।

देशकालनिमित्ता ये ते तु नैमित्तिकाः स्मृताः।
संक्रान्तिग्रहणस्नानदानश्राद्धजपादयः ॥ ३ ॥

देशेति। ये धर्मा देशकालनिमित्ता देशाः क्षेत्राणि कुरुक्षेत्रप्रयागादीनि काला व्यतीपातसंक्रान्तिग्रहणादयस्ते एव निमित्तं येषां धर्माणां ते तुपदेन नित्यधर्मादस्य कादाचित्कत्वं दर्शितं, ते धर्मा नैमित्तिका निमित्तभवाः स्मृताः स्मृतिभिः प्रतिपादिताः, तानेव स्पष्टमाह संक्रान्तीति, संक्रान्तिग्रहणस्नानदानश्राद्धजपादयः संक्रान्तिग्रहणे च कालौ, अन्येषामप्युपलक्षणमेतद्व्यतीपातादीनां देशानां चेति ज्ञेयं, तन्निमित्तकाः स्नानं प्रसिद्धं दानं द्रव्यादीनां सत्पात्रे प्रक्षेपणं श्राद्धं पितृकार्यं जपश्च गायत्र्यादिमन्त्रावृत्तिरादयो येषां यज्ञोपवासादीनां ते तथोक्तास्ते सर्वे नैमित्तिका ज्ञेयाः ॥ ३ ॥

तेषु ग्राह्यत्वात्प्रथमं प्रायश्चित्तधर्मान्दर्शयति।

प्रायश्चित्तात्मका धर्माः कृच्छ्रचान्द्रायणादयः।
कामनापूर्वकं काम्यं मुमुक्षोर्न विधीयते ॥ ४ ॥

प्रायश्चित्तेति। कृच्छ्रचान्द्रायणादयः कृच्छ्रं च शरीरशोषणा-

दिना पापनिवर्त्तकं तप्तकृच्छ्रादि चान्द्रायणं च मासादिनियमेन एकग्रासत एकैकोत्तरं पञ्चदशग्रासवृद्ध्या पञ्चदशदिनानि व्यतीत्य तत एकैकह्रासेनैकग्रासावशेषरूपमादिनी येषां ते धर्माः प्रायश्चितात्मका प्रायश्चित्तनामकाः दोषनिवर्त्तका ज्ञेयाः काम्यधर्मनिरूपणपूर्वकं तत्र मुमुक्षोः प्रवृत्तिं वारयति कामनेति, कामनापूर्वकं कामनया यत्क्रियमाणं तत्काम्यं कर्म ज्ञातव्यं तन्मुमुक्षो मोक्षेच्छोर्न विधीयते न कथ्यते तत्र विरक्तत्वात्तस्येत्यर्थः, काम्यकर्मणस्तु कामिविषयत्वादिति भावः ॥ ४ ॥

ननु निष्कामकर्मणां चित्तशुद्धिनिमित्तत्वादुपासनायाश्च भगवत्प्रसादनिमित्तत्वाच्छ्रवणादीनां च मोक्षकामनानिमित्तत्वाच्च सर्वमपि कर्मकाम्यत्वात्त्याज्यमित्याशङ्क्य तस्य कामनानिवर्त्तकत्वान्न त्याज्यत्वमित्याशयेनाह ।

हरिप्रसादकाम्या च चित्तशुद्धेश्च कामना ।
मोक्षस्य कामना चेति कामनेयं न कामना ॥ ५ ॥

हरीति । हरिप्रसादकाम्या च हरेर्भगवतः प्रसादः प्रसन्नता तस्य काम्या कामनापि च पुनश्चित्तशुद्धेश्चित्तस्यान्तःकरणस्य शुद्धिर्निर्मलत्त्वं तस्याः कामनेच्छा च पुनर्मोक्षस्य मुक्तेः कामनेच्छेयं कामनापीच्छापि न कामनाऽकामनैव सा स्वनाशहेतुत्वादिति भावः ॥ ५ ॥

सिद्धान्तयति ।

तस्मात्तया कामनया स्नानदानजपादिकम् ।
तीर्थव्रततपोनिष्ठा मोक्षकामैर्विधीयताम् ॥ ६ ॥

तस्मादिति । तस्माद्धेतोः कर्मणः कामनिवर्त्तकत्वादित्यर्थः, तया कामनया तया भगवत्प्रसादादीच्छारूपेच्छया स्नान-

दानजपादिकं स्नानं च प्रसिद्धं दानं च द्रव्यादीनां सत्पात्रे निक्षेपो जपश्च गायत्र्यादिमन्त्रस्यावृत्तिरूप आदयो यस्य तत्सर्वमपि कर्मादिपदादुपासनश्रवणमननादयो गृह्यन्ते मोक्षकामैर्मुमुक्षुभिस्तीर्थव्रततपोनिष्ठा तीर्थानि पुष्करादीनि व्रतानि एकादश्युपवासादीनि तपांसि स्वस्वकर्माचरणे क्लेशसहनरूपाणि तेषु निष्ठा सहजप्रीतिर्विधीयतां क्रियताम् ॥ ६ ॥

नन्वत्र किं प्रमाणं तत्राह।

कर्मणां निर्णयं त्वेवं गीतायामाह माधवः।
सर्वथा न परित्याज्यं नित्यं कर्म मुमुक्षुणा ॥ ७॥

कर्मणामिति। माधवः श्रीकृष्ण उभयविधलक्ष्मीच्छावतामनुल्लंघ्यवचनत्वं माधवपदेन सूचितमिति ज्ञेयं, गीतायां भगवद्गीतायां कर्मणां विहितकर्मणां त्यागेऽत्यागेवैवमनेन प्रकारेण निर्णयं निश्चयमाहोक्तवान्, किमुक्तवांस्तत्राह यज्ञ इति, यज्ञो नित्यो ब्रह्मयज्ञादिर्दानं च तपश्च मनीषिणां विवेकवतां मुमुक्षूणामित्यर्थः, पावनानि अन्तःकरणशुद्धिकारणानि सन्तीति एवमुक्तवानित्यर्थः, तथा च गीतायां 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसे'ति, अतः सर्वथा सर्वप्रकारेण मुमुक्षुणा मोक्षेच्छुना नित्यं कर्मावश्यकं सन्ध्यावन्दनादि न परित्याज्यं नैव त्यक्तव्यम् ॥ ७ ॥

ननु जिज्ञासूनां कर्मकर्तव्यतायां विहितायामपि ज्ञानिनां तु तत्त्यागो विहित एवेत्याशङ्क्य वृथाज्ञानित्वाभिमानेन न कर्तव्य इत्याह।

ज्ञाने जातेपि न त्याज्यं लोकानुग्रहहेतुना।

योवासनापरित्यागः कर्मत्यागः स एवहि ॥८॥

ज्ञान इति । ज्ञाने देहाद्यतीतात्मज्ञाने जातेपि उत्पन्नेपि लोकानुग्रहहेतुना लोकान्कर्म ग्राहयितुमिच्छया न त्याज्यं कर्म न त्यक्तव्यमयमपि निर्णयो भगवद्गीतासूक्तः, 'लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसी'त्यादिभिः। ननु 'त्यागेनैके अमृतत्वमानशुरि'ति श्रुतौ मुमुक्षूणां कर्मत्यागो विहित इत्याशङ्क्याह य इति, यो वासनापरित्यागो वासनानां जगन्मिथ्यात्वबुध्या वासनानामत्यन्ताभावज्ञानमेव परित्यागः स एव कर्मत्यागः कर्मणां त्यागः संन्यासो हि प्रसिद्ध उक्तः श्रुतावित्यर्थः ॥ ८ ॥

कर्मणो बाह्यस्य त्यागो नैव कार्यः किन्तु मनसा कर्तृकरणक्रियाणां मिथ्यात्वदृढीकरणं कार्यमित्याशयेनाह ।

न कर्मणां परित्यागः कर्मत्यागो मनोमयः ।
यज्ञो दानं तपश्चेति पावनानि मनीषिणाम् ॥ ९ ॥

नेति । कर्मणां क्रियाणां स्वरूपेण परित्यागः सर्वभावेन संन्यासो न न कर्त्तव्य इत्यर्थः, किन्तु मनोमयः मनसैव त्रिपुटीमिथ्यात्वदृष्टिरूपः कर्मत्यागः कर्मणां विहितानां त्यागः संन्यासः कर्त्तव्य इति शेषः, ननु यज्ञादिकर्मणां कुतो न त्याज्यत्वं तत्राह मनीषिणामिति, यज्ञो ब्रह्मयज्ञादिर्दानं प्रसिद्धं सत्पात्रे द्रव्यनिक्षेपरूपं तपश्च स्वस्वकर्मसु क्लेशसहनादर एतानि मनीषिणां मननवतां विवेककारणत्वात्पावनानि चित्तशोधकानि सन्तीति अतो न त्याज्यानीत्यर्थः ॥ ९ ॥

एवं कर्मत्यागे दोषं निरूप्येदानीं कर्मणां चित्तशुद्धिद्वारा ज्ञानोपकारकत्वात्तत्यागे मित्रद्रोहसम्भवात्तेन दोषेण ज्ञाना-

भावे जन्ममरणरूपसंसारनरकपातरूपानिष्टप्रदर्शनेन कर्मण्यादरं विधत्ते ।

कर्मणा चित्तशुद्धिः स्यात्तया तीव्रा मुमुक्षता ।
ततो विवेकान्मुक्तिः स्यात्कर्म त्याज्यं कथं तु तत् ॥ १० ॥

कर्मणेति । कर्मणा विहितकर्माचरणेन चित्तशुद्धिश्चित्तस्यान्तःकरणस्य शुद्धी रागादिमलापाकरणं स्याद्भवेत्तया चित्तशुध्या तीव्रा यत्नसहिता मुमुक्षुता मोक्षेच्छास्थैर्यं स्यात्ततो मुमुक्षास्थैर्याद्विवेकाद्विवेको जायते तस्मान्मुक्तिर्मोक्षः स्याद्भवेत्तत्तु ईदृशं कर्मोपकारकं कर्म विहिताचाररूपं कथं केन प्रकारेण त्याज्यं त्यागयोग्यं भवेन्न कथमपीत्यर्थः, अतस्तत्त्यागेऽनिष्टमेव स्यादिति भावः ॥ १० ॥

ननु तर्हि शुकादिषु तत्त्यागः कथं श्रूयते तत्राह ।

ये तु बोधेन संप्राप्तास्तात कर्मातिगां दशाम् ।
न विधेः किंकरास्तस्मात्स्वच्छन्दं विचरंतु ते ॥ ११ ॥

इति श्रीबोधसारे धर्मजिज्ञासायां कर्मत्यागात्यागनिर्णयः ॥ १ ॥

ये त्विति । तुपदेनोक्तपूर्वकर्माधिकारिभ्यो वैलक्षण्यमेतेषु सूचितं, ये त्वदाशङ्किताः शुकादयो बोधेन ज्ञानेन कर्मातिगां दशां कर्मणामगोचरामवस्थां संप्राप्ता याता हे तात ते दत्तादयोऽवधूता विधेर्वेदाज्ञायाः किङ्करा दासा अधिकारिण इत्यर्थः, न न भवन्ति तथाचोक्तं वृद्धैः 'वर्णाश्रमाभिमानेन श्रुतेर्दासो भवेन्नरः । वर्णाश्रमविहीनश्च वर्तते श्रुतिमूर्धनी'ति, यावद्देहात्म-

विज्ञानं बाध्यते न प्रमाणतः । प्रामाण्यं कर्मशास्त्राणां तावदेवो-पपद्यते' इति च, भगवताप्युक्तं 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येवात्मना तुष्टस्तस्य कार्यं न विद्यते ।। नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन । न चास्य सर्वभूतेषु कश्चिदर्थव्यपा-श्रय' इति, तस्मात्कर्मण्यनाधिकृतत्वात्कृतकृत्यत्वाच्च स्वच्छन्दं स्वे-च्छया कर्मण्यकर्मणि वा विचरन्तु वर्त्ततां; तथा च श्रुतिः 'स-माधिमथ कर्माणि मा करोतु करोतु वा। हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशय' इति, तेषां जीवन्मुक्तानां कृतेऽकृते वा कर्मणि गुणो दोषो वा नेति भावः ।। ११ ।।

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे धर्मत्यागात्यागविवेकार्थ-प्रकाशः प्रथमः ।। १ ।।

अथ तपस्यातात्पर्यम् ।

एवं धर्मत्यागात्यागनिर्णयं कृत्वेदानीं तत्प्रसङ्गेन तपस्त्या-गात्यागनिर्णयं निरूपयितुं तपस्यातात्पर्याख्यं प्रकरणमारभते चतुर्भिः श्लोकैः, तत्रादौ त्याज्यत्वेनाधमां तपस्यां लक्षयति ।

कृता कपटभावेन दम्भलोभपरायणैः ।
हट्टे नगरमध्ये वा सा तपस्याऽधमा स्मृता ।।१।।

कृतेति । दम्भलोभपरायणैर्दम्भो लोकक[illegible] स्वतपस्वित्वख्यापनं लोभो द्रव्यादिप्राप्तीच्छा तावेव परमयनं मनोनिवासो येषान्तैः कपटभावेन च्छलेन हट्टे व्यापारिजनदृग्-गोचरस्थाने नगरमध्ये वा नगरग्रामादिषु मध्येपि कृता या तपस्या तपःक्रिया साऽधमा निकृष्टा स्मृता प्रोक्ता मुनि-भिरिति शेषः, अतो नाङ्गीकार्या सेति भावः ।। १ ।।

मध्यमां काम्यतपस्यां लक्षयति ।

वेदशास्त्रोक्तविधिना शीतोष्णादिसहिष्णुना ।
या कृता कामनापूर्वं सा तपस्या तु मध्यमा ॥२॥

वेदेति । वेदशास्त्रोक्तविधिना वेदेन शास्त्रेण चोक्तेन विधिनाऽऽचरणेन शीतोष्णादिसहिष्णुना शीतोष्णादिसुखदुःखसहनशीलेन कर्त्रा या कृता तथा कामनापूर्वं कामनानिमित्तका च यथा तथा सा तपस्या तत्तपस्तु पूर्वविलक्षणा मध्यमा मुमुक्षुभिर्नादरणीया सेत्यर्थः ॥ २ ॥

उत्तमां मुमुक्षुग्राह्यां तपस्यां लक्षयति ।

मनसो निग्रहार्थाय परमार्थपरायणा ।
अकामा तत्वजिज्ञासोः सा तपस्योत्तमा मता॥३॥

मनस इति । तत्त्वजिज्ञासोरनारोपितात्मज्ञानेच्छोर्मनसोऽन्तःकरणस्य निग्रहार्थाय वशीकरणमेवार्थस्तदर्थं तथा परमार्थपरायणा परमार्थो मोक्षः स एव परायणं मुख्यं साध्यं यस्याः सा तथोक्ता, अकामैहिकपारलौकिकविषयेच्छाहीना या सा तपस्या सा तपःक्रियोत्तमा श्रेष्ठा स्मृता मुनिभिरिति शेषः; अतो मुमुक्षुभिरियमन्तःकरणशुध्यर्थ्यमङ्गीकार्येति भावः ॥ ३ ॥

इदानीं पूर्वोक्ताभ्यो विलक्षणां जीवन्मुक्तेषु स्थितां तां सर्वश्रेष्ठां लक्षयति ।

आगते स्वागतं कुर्याद्गच्छन्तं न निवारयेत् ।
यथाप्राप्तं सहेत्सर्वं सा तपस्योत्तमोत्तमा ॥ ४ ॥

इति श्रीनरहरिकृतौ बोधसारे धर्मजिज्ञासाप्रकरणे तपस्यातात्पर्यम्॥२॥

आगत इति । आयाते प्राप्ते पुरुषे वा कस्मिंश्चित्पदार्थे

स्वागतमादरं कुर्यात्क्रियतां गच्छन्तं गन्तारं पुरुषं वा कञ्चित्पदार्थं न निवारयेन्न निरुन्ध्यात्, किञ्च यथा प्राप्तं येन सुखरूपेण वा दुःखरूपेण प्रकारेण प्राप्तमागतं सर्वं सुखं दुःखं वा सहेत सोढव्यं सोक्तलक्षणा तपस्या तपश्चर्योत्तमोत्तमाऽतीवश्रेष्ठेयं जीवन्मुक्तेषु जीवन्मुक्तिस्थितिलक्षणरूपैवेति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे तपस्यातात्पर्यार्थप्रकाशो द्वितीय ॥ २ ॥

अथ व्रतव्यवस्था ।

इदानीं मुमुक्षूणां ग्राह्यं व्रतं निर्णेतुं व्रतव्यवस्थाख्यं प्रकरणमारभते द्विश्लोकं, तदेव व्रतं दर्शयति ।

परदारपरद्रव्यपरद्रोहविवर्जनम् ।
रागद्वेषपरित्यागो व्रतानामुत्तमं व्रतम् ॥ १ ॥

परेति । परदारपरद्रव्यपरद्रोहविवर्जनं परेषामन्येषां दाराः स्त्रियस्तथा परेषामन्येषां द्रव्याणि गृहधनादीनि तथा परेषामन्येषां द्रोहोऽनिष्टचिन्तनपूर्वकस्तदुद्योगस्तेषां विवर्जनं त्यागः, तथा रागद्वेषपरित्यागो रागो विषयस्नेहो द्वेषोऽप्रीतिस्तयोः परित्यागः सर्वथानङ्गीकार एतदेव व्रतानामेकादश्युपवासादिव्रतानां मध्य उत्तममतिश्रेष्ठं व्रतं नियमेनानुष्ठेयमित्यर्थः ॥ १ ॥

अत्र प्रमाणमाह ।

तदुक्तं काशीखण्डे,

तदुक्तमिति । तन्मन्निर्णीतमेव व्रतं काशीखण्डे ग्रन्थेप्युक्तं ज्ञेयं कथितमिति ज्ञेयमित्यर्थः ।

तत्रत्यं वाक्यमाह।

'परदारपरद्रव्यपरद्रोहपराङ्मुखः।
गङ्गाप्याह कदागत्य मामयं पावयिष्यति' ॥ २ ॥

परेति। गङ्गापि सर्वान्पावितयितुं समर्थापि प्रसिद्धा गङ्गा परदारपरद्रव्यपरद्रोहपराङ्मुखः परदारेषु परस्त्रीषु परद्रव्येषु परधनेषु परद्रोहे परानिष्टचिन्तने च पराङ्मुखो निवृत्तो ऽप्रवृत्त इत्यर्थः अयं प्रसिद्धगुणः पुरुष आगत्यागतः सन्मां सर्वजनसङ्गजन्यपापैर्मलिनां कदा कस्मिन्काले पावयिष्यति पवित्रीकरिष्यतीत्याहैवं प्राह, अत एवोक्तं विश्वास्यमिति भावः ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे व्रतव्यवस्थार्थप्रकाशस्तृतीयः ॥ ३ ॥

अथ वेषविचारः।

इदानीं संन्यासादिवेषस्यैव मुक्तिहेतुत्वप्रसिद्धेस्तन्निर्णयार्थं वेषविचाराख्यं प्रकरणं त्रिश्लोकमारभते, तत्र तावन्मुक्तेर्हेतुत्वं वेषे नास्तीत्याह।

मुक्तिर्नास्ति जटाजटे न काषाये न मुण्डने।
न भस्मनि न कन्थायां तिलके वा कमण्डलौ॥ १ ॥

मुक्तिरिति। जटाजूटे जटानां मुकुटवद्रचिते व्यूहे मुक्तिर्मोक्षो नास्ति न विद्यते तथा काषाये गैरिकादिरंजिते वस्त्रे मुक्तिर्न विद्यते मुण्डने शिखाश्मश्र्वादिवपनेन विशिष्टवेषावधारणे मुक्तिर्न विद्यते भस्मनि विभूतिलेपने मुक्तिर्न विद्यते कन्थायां

वस्त्रखण्डादिनिर्मिते वसनादौ मुक्तिर्नास्ति तिलके वा गोपीचन्दनादिना तिलके विशिष्टे धृतेपि तस्मिन्मुक्तिर्नास्ति कमण्डलौ मृदादिनिर्मिते पात्रे मुक्तिर्न विद्यते, एतेन सर्वेपि वेषा मुक्तिहेतवो न भवन्तीति सूचितमिति ज्ञेयम् ॥ १ ॥

नन्वेते वेषास्तर्हि शास्त्रेषु विहिताः कुत इत्याशङ्क्य सर्वाण्यपि वेषचिह्नानि मनोव्यापृतिसङ्कोचार्थवत्वेनेति तद्वारैवमुक्तिसाधनानि भवन्ति, तदभावे तु व्यर्थान्येवेत्याशयेनाह ।

द्वेषेन ताड्यते सर्पो वृथा वल्मीकताडनम् ।
मनसो निग्रहो नास्ति वृथा कायस्य मुण्डनम् ॥ २ ॥

द्वेषेनेति । द्वेषेन शत्रुभावेन सर्पो भुजङ्गः केवलं ताड्यते मार्यते बुधैरिति शेषः, वल्मीकताडनं मृद्विकारस्य सर्पगृहस्य ताडनं मूर्खैः क्रियमाणं दण्डादिभिर्हननमित्यर्थः, वृथा व्यर्थं निष्फलमेवेत्यर्थः, तथा मनसोन्तःकरणस्य निग्रहो व्यापारनिवृत्तिर्नास्ति न विद्यते तर्हि कायस्य शरीरस्य मुण्डनं वेषान्तरधारणं तथा वृथा निष्फलमित्यर्थः ॥ २ ॥

तर्हि शास्त्रेषु तत्र तत्र कुतो वेषमहिमा कृत इत्याशङ्क्य वैराग्येण चित्तविक्षेपन्यूनत्वार्थं न तु तदासक्त्या तद्वृद्ध्यर्थमित्याशयेनाह ।

चित्तविक्षेपशान्त्यर्थं जटाकन्थादिधारणम् ।
कुरुते वीतरागश्चेदुत्तमोत्तममेव तत् ॥ ३ ॥

इतिश्रीनरहरिकृतबोधसारे धर्मजिज्ञासाप्रकरणे वेषविचारः ॥ ३ ॥

चित्तेति । वीतरागो वीता रागा विषयस्नेहादिवृत्तयो यस्य स निवृत्तस्नेहः पुरुषश्चित्तविक्षेपशान्त्यर्थं चित्ते मन-

सि ये विक्षेपाः कार्यविशेषस्मृत्यादयस्तेषां शान्त्यर्थं निवृत्त्यर्थं जटाकन्थादिधारणं जटा असंस्कृतकेशाः कन्थाः जीर्णवस्त्रादिखण्डनिर्मिता आदिपदेन भस्मकमण्डल्वादयो गृह्यन्ते, तेषां धारणमङ्गीकारं कुरुते चेत्कर्त्रभिप्रायक्रियाफलार्थेनात्मनेपदप्रयोगेण दम्भादिना तद्धारणं निषिद्धमिति ज्ञेयं, तदेतादृशवेषधारणमुत्तमोत्तममेवात्युत्तमं सफलत्वात्तद्विहितमिति भावः ॥ ३ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे वेषविचारार्थप्रकाशश्चतुर्थः ॥ ४ ॥

अथ मौनमीमांसा ।

इदानीं ग्राह्याग्राह्यत्वं मौनस्य निर्णेतुं मौनमीमांसाख्यं प्रकरणं चतुःश्लोकमारभते, तत्रादौ मौनभेदनिरूपणपूर्वकं तद्भेदेषु भेदद्वयं सलक्षणमाह ।

मौनं चतुर्विधं प्रोक्तं वाग्मौनं वाग्विनिग्रहः ।
ज्ञानेन्द्रियाणां संरोधस्त्वक्षमौनमुदाहृतम् ॥ १ ॥

मौनमिति । मौनं लोके प्रसिद्धं यन्मौनशब्देन तच्चतुर्विधं शास्त्रे चतुःप्रकारं प्रोक्तं निरूपितं, तेषु प्रथममाह वागिति, वाग्विनिग्रहो वाचो वाण्या विनिग्रहो निरोधः स वाङ्मौनं वाच एव केवलं मौनं तूष्णीम्भावो वाङ्मौननाम्ना शास्त्रेष्वभिहितं, द्वितीयमाह ज्ञानेति, ज्ञानेन्द्रियाणां ज्ञानसाधनानि रूपादिज्ञानकरणानि यानीन्द्रियाणि तेषां संरोधोऽवरोधः स्वस्वविषयान्निवृत्तिरित्यर्थः, तुपदेनास्य पूर्वमौनादान्तरत्वं सूचितमिति ज्ञेयम्, अक्षमौनमक्षमौननाम्नोदाहृतं कथितम् ॥ १ ॥

तृतीयं मौनमाहार्धेन ।

कर्मेन्द्रियाणां संरोधः काष्ठमौनं तु काष्ठवत् ।
गौणं तु त्रिविध मौनमुत्तमं तु मनोलयः ॥ २ ॥

कर्मेति । कर्मेन्द्रियाणां क्रियासाधनानि यानीन्द्रियाणि तेषां संरोधो गमनादिविषयेभ्यो निवृत्तिः,तुशब्देन पूर्वादेतस्य जाड्येन न्यूनत्वादग्राह्यत्वं सूचितं, तदेतदतिजाड्यात्काष्ठवत्-काष्ठादिसदृशमतः काष्ठमौनं काष्ठमौननाम्नाभिहितं शास्त्रेष्वित्यर्थः, एतत्त्रितयस्याग्राह्यत्वं मुमुक्षूणामाह गौणमिति, त्रिविधं तु एतत्त्रिविधमपि मौनं गौणं निकृष्टमग्राह्यमित्यर्थः, इदानीं पूर्वत्रिविधमौनेभ्यो विलक्षणं मुमुक्षुग्राह्यं मौनमाहोत्तममिति, मनोलयस्तु मनसोन्तःकरणस्य जगत्प्रतीतिकारणस्य लयोऽत्यन्ताभावः कालत्रयासत्वप्रतीतिरेवोत्तमं तमोनिवर्त्तकत्वादतिश्रेष्ठमिदमेव मुमुक्षुभिर्ग्राह्यमिति भावः ॥ २ ॥

एतदभावेन्यमौनेषु तल्लक्षणाभावं दर्शयति ।

न मौनी मूकतां यातो न मौनी दुग्धबालकः ।
न मौनी व्रतनिष्ठोपि मौनी संलीनमानसः ॥ ३ ॥

नेति । मूकतां वाग्व्यापारहीनत्वं यातो गतो मौनी मौनवान्न न भवति वाचोवरोधे यदि मौनं भवेत्तर्हि मूकेपि तत्प्रसक्तिरिति भावः, किञ्च दुग्धबालको दुग्धपानो बालको डिम्भो मध्यमपदलोपी समासो मौनी मौनवान्न न भवति केवलकर्मेन्द्रियावरोधे मौनं स्यात्तर्हि विशेषकर्माभावेनेन्द्रियासत्वाद्बालेपि तत्प्रसक्तिरिति भावः, किञ्च व्रतनिष्ठोपि व्रतेषु चान्द्रायणादिनियमेषु निष्ठा स्नेहपूर्विकास्थितिर्यस्य सोपि मौनी मौनवान्न न भवति केवलज्ञानेन्द्रियव्यापाराभावे यदि मौनं

स्यात्तर्हि व्रतनिष्ठेऽपि तत्प्रसक्तिरिति भावः, तर्हि मौनी भवन्मते कस्तत्राह मौनीति, संलीनमानसः संलीनं कालत्रयेऽसत्त्वमापन्नं मनोन्तःकरणं यस्य स तथोक्तो मौनी मौनवान्विज्ञेयो नान्ये ॥ ३ ॥

ननु लीनमानसे मौनित्वं न प्रसिद्धं लोके क्वापीत्याशङ्क्याह ।

मुने र्भावस्तु मौनं स्याच्छब्दशास्त्रव्यवस्थया ।
मुनिभावो यर्हि नास्ति तर्हि मौनं निरर्थकम् ॥४॥

मुनेरिति । मुनेर्मननवतो भावः सत्ताऽऽशयो वा मौनं मौननामकमर्थतः स्यान्निर्मनस्कत्वं मौनमित्युक्तं भवति, एवं शब्दशास्त्रव्यवस्थया शब्दशास्त्रं व्याकरणं तस्य व्यवस्था प्रकृतिप्रत्यययोरर्थमर्यादा तया मौनशब्दार्थोऽयमेव, स मुनिभावो निर्मनस्करूपो यर्हि यदा नास्ति न विद्यते तर्हि तदा मौनं लोकप्रसिद्धं निरर्थकं व्यर्थं निष्फलमेवेत्यर्थः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे मौनमीमांसार्थप्रकाशः पञ्चमः ॥ ५ ॥

अथ दानज्ञानम् ।

दानस्यापि ग्राह्याग्राह्यविचारेण ग्राह्यं दानं ग्राहयितुं दानज्ञाना[illegible]श्लोकमेव प्रकरणमाह, तत्र तावद्दानानां भेदमाह ।

कीर्त्तिदानं कामदानं दयादानमिति त्रिधा ।
उत्तरादुत्तरं श्रेष्ठं तेभ्यः कृष्णार्पणं परम् ॥ १ ॥

कीर्तिदानमिति । कीर्तिदानं कीर्त्यै यशोर्थं दानं यत्त-

ज्ञानमिदमधमं कामदानं कामेनेह परत्र वा मम फलमेतद्दानेन स्यादितीच्छया यद्दीयते तत्कामदानमिदं मध्यमं कामिनामेव तस्य विहितत्वाद्दयादानं दयया मद्धनेन दारिद्र्यवतां केषां चित्सुखमेव भूयादितीच्छया यद्दीयते तद्दानं दयादानमिदं मुमुक्षुभिरपि कर्त्तव्यमेवातः श्रेष्ठमित्यर्थः, इति एवं प्रकारेणैतद्दानं त्रिधा त्रिप्रकारकम् । पूर्वोक्तत्रय उक्तमधमत्वादि स्पष्टयति उत्तरादिति, उक्तं त्रिविधदानमुत्तरात्पूर्वादधमादुत्तरं श्रेष्ठं तस्मादुत्तरादपि उत्तरमुपरितनं श्रेष्ठमुत्तममुत्तरोत्तरापेक्षया पूर्वपूर्वस्याधमत्वं पूर्वपूर्वापेक्षयोत्तरोत्तरस्य श्रैष्ठ्यमिति भावः, इदानीमत्युत्तमं दानं जीवन्मुक्तेषु स्थितमाह तेभ्य इति, तेभ्यः पूर्वोक्त त्रिविधदानेभ्यः कृष्णार्पणं 'कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इत्युक्तत्वात्कृष्णस्य ब्रह्मणोऽर्पणं कृतदाने ब्रह्मसत्ताया ऽवलोकनरूपं 'नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोता नान्योतोस्ति विज्ञाते'त्यादिश्रुतिदृष्ट्या दातृप्रतिगृहीत्रादित्रिपुटीबाधेन यद्दीयते तद्दानं कृष्णार्पणमित्युच्यते, तत्परमत्युत्तम मिदं जीवन्मुक्तेषु स्थितं मुमुक्षुभिस्तु साध्यमिति भावः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ
धर्मजिसार्थप्रकाशे दानज्ञानार्थप्रकाशः षष्ठः ॥ ६ ॥

अथ तीर्थनिर्णयं निरूपयितुं तीर्थतत्त्वाख्यं प्रकरणं श्लोकचतुष्कमारभते, तत्र तावत्तीर्थमिति भ्रान्तिज्ञानं तत्त्यागार्थमाह द्वाभ्याम् ।

इदं तीर्थमिदं तीर्थमितस्तीर्थमतः परम् ।
इतो दूरंतर तीर्थं मया दृष्टं न तु त्वया ॥ १ ॥

तत्र तीर्थफलं स्वल्पं मम तीर्थफलं महत् ।
इति भ्रमन्ति ये तीर्थे ते भ्रान्ता न तु तैर्थिकाः ॥ २ ॥
(युग्मम्)

इदमिति । इदन्तीर्थमिदं मत्पुरतो दृश्यते तदिदं कूपतडागादिरूपमेव तीर्थमिति भ्रमेण तत्रैव कतिचिद्दिनानि स्थित्वा ततोऽन्यत्र तीर्थं श्रुत्वा तत्र पूर्वतीर्थेऽश्रद्धां कृत्वान्यतीर्थे गत्वेदं तीर्थं पूर्वं यच्छ्रुतं तदिदं तीर्थं पवित्रताकारकं ममेति मत्वा किंचित्कालं तत्र स्थित्वैतस्तीर्थमितोप्यन्यत्तीर्थमस्तीति मत्वा तथैव तत्र गत्वा च तत्रापि पूर्ववदतोस्मादपि तीर्थात्परं श्रेष्ठं तीर्थमस्तीति मत्वा तत्र गत्वा तत्रापि केनचिदित एतस्मात्तीर्थाद्दूरतरं तीर्थमतिदूरे वर्त्तमानं तीर्थं मानसादिकमपि अन्यच्छ्रेष्ठमस्ति तन्मया दृष्टं तीर्थाधिकारिणा मयैव दृष्टं न तु त्वया न्यूनतीर्थस्नायिना भवता नैव दृष्टं तदतस्तव ते तीर्थफलं तीर्थानां फलं स्वल्पं न्यूनमस्ति मम मे तीर्थफलं तीर्थस्नानजं पुण्यं महद्बहु अस्तीति एवं प्रकारेण ये पुरुषाधमास्तीर्थे तीर्थाभासं प्रति भ्रमन्ति गच्छन्ति मात्रं ते पुरुषा भ्रान्ता भ्रमणवन्त एव केवलं न तु नैव तैर्थिकास्तीर्थस्वरूपविदस्तेषां भ्रान्तिरेव फलं भ्रमणस्य न तु तीर्थफलमिति भावः ॥ १ ॥ २ ॥

इदानीं तीर्थतत्त्वनिरूपणपूर्वकं तद्विद आह ।

तीर्थे पापक्षयः स्नानैस्तीर्थे साधुसमागमः ।
तीर्थे वैराग्यचर्चा स्यात्तीर्थमीश्वरपूजनम् ॥ ३ ॥

तीर्थ इति । तीर्थे पुष्करादौ स्नानैरवगाहैरिदं चोपलक्षणं दानदैवपैत्रकर्मणां, पापक्षयः पापानां दुष्कृतकर्मणां क्षयो नाशो भवतीति निश्चयः कार्यः, तीर्थे पुष्करादौ साधुसमागमः

साधूनां विवेकिनां समागमः सङ्गतिः स्यान्मम भूयादिति निश्चयः कर्त्तव्यस्तदेव तीर्थमित्यर्थः, पूर्वतोपि उत्तरत्रादरः कर्त्तव्य इति भावः, तीर्थे सत्सङ्गरूपे तीर्थे वैराग्यं विषयवैरस्यं तस्य तत्प्रतिपादकशास्त्रस्य चर्चा निरूपणं स्याद्भवेदत्रापि पूर्वत आदरो विशिष्टो विधेय इत्याशयः, तीर्थं ततोपि पवित्रकारकमीश्वरपूजनमीश्वरस्यान्तर्यामिणः पूजनं तल्लक्षणैर्ज्ञानमस्ति पूर्वतोप्यत्रादरो विशेषः कार्य इति भावः ॥ ३ ॥

तीर्थं शीतोष्णसहनं तीर्थं निःसङ्गचारिता ।
इति जानन्ति ये तीर्थं तीर्थतत्त्वविदो हि ते ॥ ४ ॥

इति श्रीबोधसारे धर्मजिज्ञासायां तीर्थतत्वाख्यं प्रकरणम् ॥ ७ ॥

तीर्थमिति । ततोपि तीर्थमन्तःकरणशुद्धिकारणं शीतोष्णसहनं शीतं शैत्यजन्यं दुःखमुष्णं तापजन्यं दुःखं तदादिद्वन्द्वसहिष्णुत्वमधिकं ज्ञेयं, किञ्च तीर्थमन्तःकरणशुद्धिकरं निःसङ्गचारिता स्वासङ्गत्वानुभवस्तदेतेपूत्तरोत्तरं विशिष्टादरणीयत्वमेवेत्येवं ज्ञात्वा ये विवेकिन उक्तप्रकारेण तीर्थं यथार्थं तीर्थस्वरूपं जानन्ति विदन्ति ते हि ते एव नत्वन्ये तीर्थतत्त्वविदस्तीर्थानामन्तकरणशुध्युपायभूतानां तत्त्वं यथार्थस्वरूपं विदन्ति ते तथा मन्तव्यास्तान्पृष्ट्वा स्वयमपि तथा कर्त्तव्यमिति भावः।

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे तीर्थतत्वार्थप्रकाशः सप्तमः ॥ ७ ॥

अथाचारचातुरी ।

आचारोपि ग्राह्यस्त्याज्यश्चेति द्विविधोऽतस्तत्र ग्राह्यं ग्राहयितुं त्याज्यं त्याजयितुमाचारचातुर्याख्यमेकश्लोकं प्रकरण-

मारभते, तत्र चानाचारनिषिद्धाचारयोर्लक्षणनिरूपणपूर्वकं सदाचारलक्षणं निरूपयति ।

अनाचारस्तु मालिन्यमत्याचारस्तु मूर्खता ।
विचाराचारसंयोगः सदाचारस्य लक्षणम् ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे धर्मजिज्ञासायामाचारचातुरी ॥ ८ ॥

अनाचार इति । अनाचारस्तु केवलमाचारत्याग एव प्रत्यवायजनकत्वादन्तःकरणशोधको न भवति प्रत्युत मालिन्यं मलिनत्वकारणमेव स्यादिति शेषः, किञ्चात्याचारस्तु समीचीनदृष्ट्यान्येषां वर्णभेदेनाश्रमभेदेन वा श्रेष्ठानां य आचारः स स्वस्य मलिनत्वकारकत्वात्तस्मिन्प्रवृत्तिश्चेत्सा मूर्खता मूर्खत्वमेव, तत्तर्हि कः सदाचारस्तत्राह विचाराचारसंयोगो विचारः स्वस्य ग्राह्याग्राह्यविवेक आचारः स्वयोग्यकर्माचरणं तयोः संयोगः सहवर्त्तनं तदेव सदाचारस्य प्रामाणिकाचरणस्य लक्षणं चिह्नं ज्ञेयमिति शेषः, तथा स्वयमपि ज्ञात्वाचरेति भावः ॥१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ धर्मजिज्ञासार्थप्रकाशे आचारचातुर्याख्यप्रकरणार्थप्रकाशोऽष्टमः ॥ ८ ॥

अथ रागत्यागात्यागनिर्णयः ।

एवं सभेदां धर्मजिज्ञासां निरूप्येदानीं वैराग्यस्य मुक्तिहेतुत्वप्रसिद्धेस्तथापि बाह्यत्यागमात्रेण कृतार्थता न स्यादिति ज्ञापयितुं रागत्यागनिर्णयाख्यं षट्श्लोकं प्रकरणमारभते, तत्र तावद्बाह्यत्यागमात्रस्य वैराग्यत्वेतिप्रसङ्गदर्शनपूर्वकं मुख्यवैराग्यलक्षणमाह ।

न विरक्ता धनैस्त्यक्ता न विरक्ता दिगम्बराः ।
विशेषरक्ताः स्वपदे ते विरक्ता मता मम ॥ १ ॥

नेति । धनैर्द्रव्यैस्त्यक्ता रहिता विरक्ता वैराग्यवन्तो न न भवन्ति केवलबाह्यधनादित्यागमात्रं विरक्तलक्षणं चेन्निर्द्रव्येषु तत्प्रसाक्तिरिति भावः, किंच दिगम्बरा न-ग्ना न विरक्ता वैराग्यवन्तो न भवन्ति नग्नत्वमेव वैराग्यल-क्षणं चेद्बालादिषु तत्प्रसक्तिरिति भावः, तर्हि विरक्ताः के तत्राह विशेषेति, ये पुरुषाः स्वपदे स्वस्वरूपे वा स्वाधिकारा-नुरूपे स्वस्वभावानुकूल्येन प्राप्ते वा वर्णाश्रमाद्याचाररूपे कर्मणि वा विशेषरक्ताः स्वस्वरूपस्थितिमविस्मृत्य बाधितत्वदृष्ट्या वर्त्तमाना अपि लोकदृष्ट्याऽऽसक्ता इव स्थिताः स्वरूपे तु अ-त्यन्तासक्ता एव ते एतादृशा मे मम मद्दृष्ट्येत्यर्थः, विरक्ता वैराग्यवन्तो मता निश्चिता न तु बाह्यत्यागमात्रेण वैराग्य-वन्तो भवन्तीति भावः ॥ १ ॥

बाह्यत्यागमात्रेण वैराग्याभावमेवोदाहृत्य दर्शयति द्वाभ्याम् ।

चौरस्त्यजन्ति गेहं स्वं भयेनैव न बोधतः ।
जारास्त्यजन्ति गेहं स्वं कामेनैव न बोधतः ॥ २ ॥

चौर इति । चौरस्तस्करः कदाचित्स्वकर्मणः प्राकट्येन राजादिभयात्स्वं स्वीयं गेहं गृहमुपलक्षणं चैतत्कुटुम्बक्षेत्रवि-त्तादेः, सर्वमित्यर्थः, त्यजति परित्यज्य गच्छति स तस्य त्यागो भयेनैव दण्डादिभीत्यैव केवलं न बोधतो न तु ज्ञानेन, केवलं गृहादित्यागमात्रेण बोधं विना विरक्तश्चेच्चौरेपि तत्प्रसक्तिरिति भावः, किञ्च जाराः परस्त्र्यासक्ता उपपतयः स्वकर्मणः प्रा-

कव्ये परस्त्रियं गृहीत्वा त्यक्त्वा वा स्वं स्वीयं गेहं गृहं स्वगृह-कुटुम्बपुत्रक्षेत्रवित्तादि सर्वमपीत्यर्थः, त्यजन्ति परित्यज्य गच्छन्ति देशान्तरं स त्यागः कामेनैव कामनिमित्तक एव स न बोधतो न तु ज्ञानेन, ज्ञानं विना केवलगृहादित्यागमात्रेण विरक्तत्वे जारेष्वपि तत्प्रसक्तिरिति भावः ॥ २ ॥

क्रुद्धस्त्यजति गेहं स्वं प्रतिवादिविरोधतः ।
रुद्धस्त्यजति गेहं स्वं रोधेनैव न बोधतः ॥ ३ ॥

क्रुद्ध इति । क्रुद्धः क्रोधवान्स्वं स्वीयं गेहं गृहं सर्वमित्यर्थः, त्यजति परित्यज्य देशान्तरं गच्छति स त्यागः प्रतिवादिविरोधतः स्वबन्धुजनविरोधेन वा परकीयशत्रुजनविरोधेन वा न तु बोधेन बाह्यगृहादित्यागमात्रेण विरक्तत्वे क्रोधिष्वपि तत्प्रसक्तिरिति भावः, किञ्च रुद्धो निगडादिना कारागृहेऽवरुद्धः स्वं स्वीयं गेहं गृहं धनादिसर्वमपीत्यर्थः, त्यजति परित्यज्य गच्छति देशान्तरं स त्यागो रोधेनैवावरोधनिमित्तक एव न बोधतो न तु ज्ञानेन, तथा च बाह्यत्यागमात्रेण विरक्तत्वे रुद्धत्यागेपि तत्प्रसक्तिरिति भावः ॥ ३ ॥

एवं बोधाभावे त्यागासिद्धिं प्रदर्श्य बोधे सति तु त्यागः सिद्ध एवेति बाह्यत्यागेनात्यागेन वा न किञ्चित्प्रयोजनमित्याह ।

निःसङ्गतासुखं प्राप्ताः कया चिद्बोधलीलया ।
गृहं त्यजन्ति मुनयो गृहस्था वा वने स्थिताः ॥४॥

निःसङ्गेति । कया चिदनिर्वचनीयया विद्वदनुभवगम्यया बोधलीलया ज्ञानमेव लीलाऽनायासचेष्टा तद्रूपया निःसङ्गतासुखमसङ्गसुखं प्राप्ता गताः सन्तो मुनयो विवेकिनः गृहं गृ-

हादिकं सर्वं त्यजन्ति मिथ्येत्यनुभवन्ति, ततश्च गृहस्था गृहे एव स्थिता वा वने स्थिता गृहादि त्यक्त्वा वनाद्युपलक्षिते स्थाने स्थितास्त उभयेपि समाना एवेत्यर्थः ॥ ४ ॥

अस्मिन्नर्थे वृद्धसंमतिमाह ।

तदुक्तम् ।

तदुक्तमिति, इदमेवोक्तं वृद्धैरित्यर्थः, तद्वाक्यं पठति ।

'मूढः किं त्यजतु प्रमत्तमनसस्त्यागेन वा किं फलं।
विज्ञः कर्म करोतु वा न कुरुतां त्यागेऽवलिप्तो न यत्।
इत्येवं कृतनिश्चयः प्रवचनैरद्वैतविद्यावतां ।
रागत्यागनिरादरो मुनिजनः पारे गिरां खेलति॥ ५॥

मूढ इति । मूढो मूर्खः किं किमपिवस्तु त्यजतु नाङ्गीकरोतु प्रमत्तमनसः प्रमत्तं कार्याकार्यविचारहीनं मनोन्तःकरणं यस्य तस्य कृतेनापि त्यागेन वैराग्येण किं फलं न किमपि फलं तादृशत्यागस्य तस्येत्यर्थः, तुषकण्डनवद्व्यर्थमेव तदिति भावः; किञ्च विज्ञः कर्तृत्वादिमिथ्याज्ञानवान्तस्मिन्सर्वस्यापि बाधितत्वात्स कर्म क्रियां करोतु आचरतु वा न कुरुतां नाचरतु तदुभयमपि तस्य सममित्यर्थः, कुत इत्यत आह यद्यस्मात्कारणात्त्यागेपि कर्मानाचरणेऽपिशब्दात्तदाचरणेपि अवलिप्तः कर्तृत्वाकर्तृत्वरूपलेपवान्न भवति अतस्तस्य त्यागात्यागौ समावेवेति भावः, इत्येवमनेन प्रकारेणाद्वैतविद्यावतामद्वैतज्ञानिनां प्रवचनैः स्वोपदेशकवाक्यैः कृतनिश्चयो दृढनिश्चयवान्मुनिजनो विवेकिसार्थो रागत्यागनिरादरो रागः स्नेहस्त्यागस्संन्यासस्तयोरादररहितः सन्गिरां विध्यतीतत्वाद्वेदवचसां पारेऽगोचरे ब्रह्मणि खेलति कदाचित्कर्मणा कदाचित्त्यागेन वा क्रीडति

न तूभयमपि तस्य गुणकृतद्दोषकृद्वा स्यादिति भावः ॥ ५ ॥
उक्तमुपसंहरति ।

इत्ययं योगयुक्तानां रागत्यागविनिर्णयः ।
त्यजतैव हि तज्ज्ञेयमिति वेदान्तनिर्णयात् ॥ ६ ॥

इति श्रीनरहरिकृतौ बोधसारे रागत्यागात्यागनिर्णयः ॥ ६ ॥

इतीति । योगयुक्तानां जीवात्मैकत्वज्ञानमेव योगस्तद्वता-मयमुक्तलक्षणो रागत्यागविनिर्णयो रागस्य स्नेहस्य त्यागः संन्यासस्तस्य विनिर्णयो विनिर्णीयते ऽनेति विनिर्णयः प्रकरणमिति समाप्तमित्यर्थः, नन्वेतन्निरूपणस्य किं कारणम-त्रेत्यत आह त्यजतेति, यस्माद्धि वेदान्तनिर्णयाद्वेदान्तो ब्रह्मा-त्मैकत्वं तन्निर्णीयतेनेनेति वेदान्तनिर्णयमुपनिषत्सूत्रवार्ति-कादिकं तच्छ्रवणादिव्यापारादित्यर्थः, त्यजतैव त्यागं कृतवतै-वात्मरूपं तद्ययार्थं ज्ञेयं ज्ञातुं शक्यमस्ति नात्यागवतेति अतो हेतोस्त्यागनिर्णयः मोक्ष इति भावः ॥ ६ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ रागत्यागविनिर्णयार्थप्रकाशः षष्ठः ॥ ६ ॥

अथाधिकारपरीक्षा ।

एवं रागत्यागनिर्णयं निरूप्येदानीं यत्र धर्मे येन प्रवर्ति-तव्यमधिकारिणा तज्ज्ञानार्थमधिकारपरीक्षाख्यं षट्श्लोकं प्र-करणमारभते, तत्रादौ धर्माणां बहुत्वादधिकारिणोपि बहुत्वं त-त्तद्धर्माधिकारिनिरूपणार्थमाह ।

धर्मा बहुविधाः प्रोक्ताः शास्त्रे धर्माधिकारिणाम् ।
तत्र तीव्रा मुमुक्षैव मोक्षे मुख्याधिकारिता ॥ १ ॥

धर्मा इति । शास्त्रे वेदे धर्माधिकारिणां यत्र यत्र धर्मे येषामधिकारोस्ति तेषां बहुविधा अनेकप्रकारा धर्माः प्रोक्ताः सन्तीति शेषः, तत्र मोक्षधर्मेधिकारिणमाह तत्रेति, तत्र धर्मेषु मध्ये मोक्षे मोक्षधर्मे तीव्रा फलपर्यवसाना मुमुक्षैव मोक्षेच्छैवाऽधिकारिताऽधिकारित्वं मतोक्ता मुनिभिरिति शेषः ॥ १ ॥

इदानीमन्यधर्मेषु अधिकारिनिरूपणपूर्वकं पुनरपि मोक्षधर्माधिकारिणमाह ।

ज्योतिष्टोमे स्वर्गकामो विवाहे पुत्रकामवान् ।
वाणिज्ये लोभवान्मोक्षे मुमुक्षुरधिकारवान् ॥ २ ॥

ज्योतिष्टोम इति । स्वर्गकामः स्वर्गसुखे काम इच्छा यस्य स ज्योतिष्टोमे ज्योतिष्टोमनाम्नि यज्ञेऽधिकारवानधिकारी ज्ञेयः, विवाहे स्त्रीपरिणयनादिकर्मणि पुत्रकामवान्पुत्रेऽपत्ये काम इच्छा यस्य विद्यते सोऽधिकारी ज्ञेयः, किञ्च वाणिज्ये व्यापारकर्मणि लोभवान्धनलोभ्यऽधिकारवानधिकारी ज्ञेयः, मोक्षे मोक्षसाधनभूते कर्मणि मुमुक्षुर्मुक्तीच्छावानधिकारवानधिकारी ज्ञेयः ॥ ३ ॥

ननु मोक्षधर्माधिकारिणा मुमुक्षुणा बुद्धिमान्द्ये सति कुत्र प्रवर्त्तितव्यं तत्राह ।

तीव्रा मुमुक्षा यद्यस्ति प्रज्ञामान्द्यं च वर्त्तते ।
सच्छास्त्रविद्वच्चर्चाभिः प्रथमं तन्निवारयेत् ॥ ३ ॥

तीव्रेति । यदि यर्हि तीव्रा वैराग्यादियुक्ता दृढा मुमुक्षा मोक्षेच्छास्ति विद्यते प्रज्ञामाद्यं च बुद्धेर्मान्द्येनार्थधारणासामर्थ्यमपि वर्त्ततेस्ति यस्य सोधिकारी प्रथममादौ सच्छास्त्र

विद्वच्चर्चाभिः सच्छास्त्राणि वेदान्तग्रन्था विद्वांसो वेदान्ततात्पर्यानुसन्धानपूर्वकं स्वमात्र[illegible] तैः सह वा चर्चाभिः प्रश्नपूर्वं तदुत्तरं विचार्याज्ञाते पुनः प्रश्नादिरूपास्ताभिस्तद्बुद्धिमौढ्यं निवारये[illegible] बुद्धौ सर्वपदार्थधारणसामर्थ्यं संपादयेदिति भावः ॥ ३ ॥

ननु तीव्रमुमुक्षायां सत्यामपि बुद्धिमान्द्ये च विद्यमाने वेदश्रवणानधिकारिणा शूद्रादिना कथं बुद्धिमान्द्यं निवार्य, मोक्षे प्रधानसाधनभूतं ज्ञानं च कथं संपाद्यं तत्राह ।

वेदे नास्त्यधिकारोस्य मुमुक्षा यदि वर्त्तते ।
विचारस्तेन कर्त्तव्यः पुराणश्रवणादिना ॥ ४ ॥

वेद इति । अस्य मुमुक्षोः शूद्रादेर्वेद उपनिषदादिश्रवणेऽधिकारो योग्यता नास्ति न विद्यते परन्तु मुमुक्षा मोक्षेच्छा यदि यर्हि विद्यतेस्ति तर्हि तेन वेदश्रवणानधिकारिणा शूद्रादिना विचारः श्रवणमनननिदिध्यासनरूपः पुराणश्रवणादिना पुराणानां भागवतादीनां श्रवणमादिर्यस्य मननादेस्तत्तथा तेन, अनेनेदानीन्तनग्रन्थभाषाग्रन्थादिसर्वमुपलक्ष्यते तेनेत्यर्थः, कर्त्तव्यः कुर्यात् ॥ ४ ॥

ननु वेदश्रवणजं ज्ञानं पुराणश्रवणेन कथं स्यात्तत्राह ।

यदेव वेदे कथितं पुराणेपि तदेव हि ।
न तु वेदाक्षरं श्राव्यमिति भाष्ये विनिर्णयः ॥५॥

यदिति । वेद उपनिषदादिरूपे ज्ञानप्रतिपादकभागे यदेव यच्च ज्ञानं कथितं प्रतिपादितमस्ति पुराणेपि पुराणशब्दवाच्य आर्षग्रन्थे वासिष्ठादौ तदेव वेदोक्तं ज्ञानमेवास्ति नान्य-

त्कथितं हि निश्चये, ननु वेदोक्तमेव ज्ञानं पुराणेष्वप्यस्ति चेद्वेदश्रवणं कुतो निषिध्यते तत्राह नत्विति, वेदाक्षरं वेदानामुपनिषदामक्षरं वर्णा जातावेकवचनं न तु नैव श्राव्यं श्रोतव्यमिति एवंप्रकारो भाष्यविनिर्णयो भाष्ये शारीरके विनिर्णयो निर्णीतोऽर्थोस्ति अतो मया निषिध्यत इति भावः ॥ ५ ॥

ननु मास्तु वेदश्रवणेऽधिकारो वेदश्रवणे कृते तु ज्ञानं स्यादेवेत्याशङ्क्याविहितकरणे फलं न स्यात्प्रत्युत दोष एव स्यादित्याह ।

यथाधिकारविहितं कर्म सिध्यति चान्यथा ।
कार्यसिधिर्न जायेत प्रत्यवायो महान्भवेत् ॥६॥

इति श्रीनरहरिकृतौ बोधसारेऽधिकारपरीक्षा ॥ ७ ॥

यथेति । यथाधिकारविहितं स्वाधिकारमनुल्लङ्घ्य यत्तद्यथाधिकारं तच्च तद्विहितं चेति तत्तथा कर्म क्रिया सिध्यति फलति अन्यथा स्वाधिकारमुल्लङ्घ्य परविहितं कर्म कृतं चेत्कार्यसिद्धिः कार्यस्य कर्मणः सिद्धिः फलं न जायेत न भवेत्प्रत्युत महाननिवार्यः प्रत्यवायो दोषो भवेत्स्यादत आग्रहोऽनधिकारिणान्यविहिते कर्माणि न कार्य इति भावः ॥ ६ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपिकायामधिकारपरीक्षार्थप्रकाशः सप्तमः ॥ ७ ॥

अथ सत्संगसुधा ।

एवमधिकारिभेदनिर्णयेन तत्तत्कार्यनिर्णयं विधायेदानीं सर्वसाधनमुख्यज्ञानकारणभूतं सत्सङ्गं विधातुं तत्प्रशंसार्थं सत्सङ्गसुधाख्यमष्टश्लोकं प्रकरणमारभते, तत्रादौ सत्सङ्गेन मनसि सुखाविर्भावे स्वमोहमुक्तिः स्यादेवेति निश्चेतव्यमित्याह ।

सत्संगसुधया तात मन आनन्दितं यदा ।
निश्चेतव्यं तदा मोहान्मम मुक्तिर्भविष्यति ॥ १ ॥

सत्सङ्गेति, हे तात सत्सङ्गसुधया सतां विवेकिनां सङ्गः सङ्गतिः स एव सुधाऽमृतं सुखदत्वान्मृतिनिवर्त्तकत्वाच्चेति भावः, तथा मनोन्तःकरणं यदा यस्मिन्काले आनन्दितं सञ्जातसुखं स्यात्तदा तस्मिन्काले मम मे मोहादज्ञानान्मुक्तिर्मोक्षो भविष्यति स्यादिति निश्चेतव्यं निश्चयः कार्यः, सत्सङ्गप्रेमैव मुख्यं भाविमोक्षस्य चिन्हमिति भावः ॥ १ ॥

ननु सत्स्वन्यसाधनेषु किं सत्सङ्गत्या तत्राह ।

साधनानां हि सर्वेषां वरिष्ठा साधुसङ्गतिः ।
एतया सिद्धया सिद्धं सर्वमेव हि साधनम् ॥ २ ॥

साधनानामिति । सर्वेषां समस्तानां साधनानां साधनभूतानां करणानां मध्ये साधुसङ्गतिः साधूनां सज्जनानां सङ्गतिः सङ्गो वरिष्ठा श्रेष्ठा सैव सर्वसाधनमूलमित्यर्थः, तदेव स्पष्टयति एतयेति, एतया सत्सङ्गत्या सिद्धया जातया सर्वं साधनं समस्तसाधनजातं सिद्धं प्राप्तं हस्तगतमिति यावद्भवति जायतेऽतः सत्सङ्ग एव सर्वसाधनेषु श्रेष्ठतर इति भावः ॥ २ ॥

ननु सतां किं लक्षणं येषां सङ्गो विधीयते तत्राह ।

शश्वदीश्वरभक्ता ये विरक्ताः समदर्शनाः ।
साधवः सेवितव्यास्ते मोक्षशास्त्रविशारदाः ॥ ३ ॥

शश्वदिति । ये पुरुषाः शश्वन्निरन्तरमीश्वरभक्ता ईश्वरस्य शिवस्य विष्णोर्वा भक्ता दासाः सेवका इत्यर्थः, वि-

रक्ता ईश्वरातिरिक्तसकलपदार्थेषु वैराग्यवन्तः समदर्शिनः समं ब्रह्म पश्यन्ति साक्षादनुभवन्ति ते तथा मोक्षशास्त्रविशारदा मोक्षस्य मोक्षसाधनज्ञानस्य च प्रतिपादकं यच्छास्त्रं वेदान्तास्तस्मिन्विशारदाः पदपदार्थविदस्ते साधवः परकार्यसाधने दक्षास्ते सेवितव्याः सेवितुं योग्यास्तेषां सेवा कार्येति भावः ॥ ३ ॥

अन्यान्यपि साधुलक्षणान्याह चतुर्भिः ।

येषां दर्शनमात्रेण मोक्षे श्रद्धा विवर्धते ।
येषां च वाग्विलासेन संशयो विनिवर्त्तते ॥ ४ ॥

येषामिति । येषां पुरुषविशेषाणां दर्शनमात्रेण केवलं दर्शनेनैव मोक्षे मोक्षशास्त्रे श्रद्धा विश्वासो विवर्धते वृद्धा भवति, किञ्च येषामिति, येषां च पुरुषविशेषाणां वाग्विलासेन प्रश्नप्रत्युत्तरवचनरूपक्रीडयैव संशयः सन्देहो विनिवर्त्तते निवृत्तो भवति ॥ ४ ॥

किञ्च ।

उपक्रमादितात्पर्यलिङ्गैस्तात्पर्यनिर्णयः ।
विशेषसामान्यतया शास्त्रार्थानां व्यवस्थितिः ॥५॥

उपक्रमेति । उपक्रमादितात्पर्यलिङ्गैरुपक्रमः प्रकरणप्रतिपाद्यस्य वस्तुनः प्रकरणारम्भ उद्देशः स आदिर्येषामुपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तीनां तानि उपक्रमादितात्पर्यलिङ्गानि तात्पर्यस्य सर्वप्रकरणार्थस्यावद्योतकानि चिह्नानि तैस्तात्पर्यनिर्णयस्तात्पर्यस्य प्रकरणप्रतिपाद्यार्थस्य निर्णयो निर्णीयते निश्चीयतेऽनेनेति निर्णयो निश्चयो येषां वाक्यादवाप्यते इति तृतीयस्थेन सहान्वयः, तथा शास्त्रार्थानां व्यवस्थितिः शास्त्राणां सर्ववाक्यानामर्था विषयास्तेषां व्यवस्थि-

तिर्व्यवस्था विशेषसामान्यतया केषां चिद्विशेषत्वेन केषांचित्सामान्यत्वेन सर्ववाक्यानां स्वस्वार्थप्रतिबोधकत्वेप्येकार्थपरिनिष्ठत्वमित्यर्थः, इयं व्यवस्थितिर्येषां वाक्यादवाप्यते ॥ ५ ॥

किञ्च ।

वेदशास्त्राविरोधेन मोक्षमार्गप्रवेशनम् ।
संप्रदायपरिज्ञानं मतभेदविनिर्णयः ॥ ६ ॥

वेदेति । वेदशास्त्राविरोधेन वेदा ऋगादयः शास्त्राणि मीमांसादीनि तेषामविरोधेन विरोधपरिहारेण मोक्षमार्गप्रवेशनं मोक्षस्य मुक्तेर्मार्गे साधनभूते ज्ञाने प्रवेशनं प्रविश्यतेनेनेति प्रवेशनं प्रवृत्तिज्ञानं करणे ल्युट्, येषां वाक्यादवाप्यते, किञ्च मतेति, मतभेदपरिज्ञानं मतानां शैववैष्णवादीनां भेदस्य वैलक्षण्यस्य परिज्ञानं यथार्थसम्यग्बोधो येषामिति पूर्ववत्, किञ्च संप्रदायेति, संप्रदायविनिर्णयः शैववैष्णवादिमतप्रवर्त्तकानामाशयनिर्णयो यथार्थस्फुरणं येषामिति पूर्ववत् ॥ ६ ॥

केन प्रकारेणावाप्यते तदाह ।

पूर्वोत्तराभ्यां पक्षाभ्यां येषां वाक्यादवाप्यते ।
ज्ञानिनः कर्णधारास्ते सेवितव्या हि साधवः॥७॥

पूर्वोत्तराभ्यामिति । पूर्वोत्तराभ्यां पक्षाभ्यां स्वकृतेन पूर्वपक्षेण वक्तुश्चोत्तरपक्षेण च येषां पुरुषविशेषाणां वाक्यात्संवादादिरूपाद्वचनविलासात्पूर्वोक्तं सर्वमवाप्यते प्राप्यते ते ज्ञानिनो जीवब्रह्मैक्यज्ञानवन्तो लौकिकव्यवहारे सम्यग्ज्ञानवन्तश्च कर्णधाराः संसारसमुद्रे मुमुक्षूञ्ज्ञाननाव्यारोप्य तारकाः साधवः परकार्यसाधनप्रयोजनास्ते सेवितव्याः सेवितुं योग्या ज्ञेयाः ॥ ७ ॥

अस्मिन्नर्थे गीतावाक्यं प्रमाणयति ।

तथा च गीता ।

तथाचेति । इममर्थं गीताप्याहेत्यर्थः, केन वाक्येनेत्याशङ्क्य तदाह ।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥ ८ ॥

इति श्रीनरहरिकृतौ बोधसारे सत्सङ्गसुधा ॥ ८ ॥

तदिति । हे अर्जुन तज्ज्ञानं ज्ञेयं च प्रणिपातेन प्रणामेन परिप्रश्नेन प्रश्नादिवार्त्तया सेवया तेषां परिचर्यया विद्धि जानीहि लभस्व वा तेभ्यो ज्ञानप्राप्तौ सन्देहो न कर्त्तव्य इत्याहोपदेक्ष्यन्तीति, ते साधवो ज्ञानिनो ज्ञानवन्तस्तत्त्वदर्शिन अनारोपितमेव स्वरूपं पश्यन्ति ते तथा ज्ञानं ज्ञानसाधनमुपदेक्ष्यन्ति उपदेशं करिष्यन्तीत्यर्थः ॥ ८ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ सत्सङ्गसुधार्थप्रकाशोऽष्टमः ॥ ८ ॥

अथ समन्वयसरस्वती ।

एवं सर्वसाधनानां प्रधानकारणभूतसत्सङ्गकर्त्तव्यतां विधायेदानीं सर्वशास्त्राणां वेदान्तानुकूल्यं दर्शयितुं तत्तद्द्वारेणोपयोगनिरूपणार्थं समन्वयसरस्वत्याख्यं षट्श्लोकं प्रकरणमारभते, तत्रादौ निरूपयितव्यप्रकरणश्रवणे श्रद्धां जनयितुं फलप्रदर्शनेन शिष्यं तदभिमुखीकरोति ।

अवगाह्या विशेषेण समन्वयसरस्वती ।
जायेत मतभेदाख्यपङ्कप्रक्षालनं यया ॥ १ ॥

अवगाह्येति। हे शिष्य भवताऽन्यैश्चाधिकारिभिः समन्वयसरस्वती सम्यगेकस्मिन्नेवार्थेऽन्वयः तात्पर्यबोधकः सम्बन्धो यस्याः सा सरस्वती भारती वाग्रूपा विशेषेण परमादरेणाऽवगाह्या विचार्या, ननु समन्वयसरस्वत्यवगाहनेन किं फलं तत्राह जायेतेति, यथा समन्वयसरस्वत्या मतभेदाख्यपङ्कप्रक्षालनं मतानां व्याकरणादिशास्त्रप्रतिपाद्यानामर्थानां भेदो भेदप्रतीतिः सैवाख्या नाम यस्य तदेव पङ्को मलस्तस्य प्रक्षालनं निवर्त्तनं जायेत भवेदिदमेव फलं तस्येति भावः ॥१॥

एवं फलदर्शनेनैतत्प्रकरणं श्रोतुं सन्मुखीकृत्येदानीं सर्वशास्त्राणां ब्रह्मणि समन्वयं वक्तुं प्रथमं मोक्षे यानि साधनानि तान्याह।

पदं पदार्थो वाक्यार्थस्तत्वानि मनसो यमः।
महावाक्यार्थविज्ञानं साधनानि क्रमेण हि ॥ २ ॥

पदमिति। पदं सुप्तिङन्तं प्रसिद्धं पदमेकं, 'सुप्तिङन्तं पदमि'ति सूत्रितत्वात्पदार्थो पदस्य वाच्यो लक्ष्यो वार्थो द्वितीयं, वाक्यार्थः पदसमूहो वाक्यं सक्रियापदमित्युक्तलक्षणस्य वाक्यस्यार्थस्तात्पर्यं तृतीयं, तत्वानि प्रकृतिपुरुषौ द्वौ महदादयः सप्त मनआदयो विकाराः षोडशैवं पञ्चविंशतिसंख्यानि चतुर्थं, मनसो यमश्चित्तस्य निरोधाख्यो योगः पञ्चमं, महावाक्यार्थविज्ञानं महावाक्यानि तत्त्वमस्यादिवाक्यानि तेषामर्थो जीवब्रह्मणोरेकत्वरूपस्तस्य विज्ञानमनुभवः षष्ठम्, एतानि षट्साधनानि मोक्षस्य कारणानि क्रमेण क्रमतो हि प्रसिद्धानि विदुषामित्यर्थः ॥ २ ॥

तेषु सर्वसाधनेषु सर्वशास्त्राणामुपयोगनिरूपणं प्रतिजानीते।

परिग्रहण सं० 7866
ग्रन्थालय. के ल नि भि संस्थान

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	६
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

विज्ञापनम् ।

—:०:—

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः [illegible] । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेना[illegible] तैस्तदेकैकस्य खण्डस्य ।||) मूल्यं प्रापणव्ययश्च =) देयः । अन्यमहाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम्	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम)	८	०
वेदान्तदीपः (श्रीमगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि [illegible]	[illegible]	०
पातञ्जलदर्शनम् श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा सर्वतन्त्रस्वतन्त्रश्रीमदन्नंभट्टप्रणीता ख० ४	४	०
[illegible]मञ्जरी । व्यङ्ग्यार्थकौमुदी प्रकाशेन च सहिता	३	०
[illegible]कारः व्याख्यासहितः	१	०
[illegible] नरहरिकृत [illegible] स० (ख०)	१	०
[illegible]लीलावती (यन्त्रस्था)	०	०

[illegible]भूषण दास और कम्पनी